नवीदिल्लीतः प्रकाशितम्

# रामायण वार्ता

दिल्ली : वर्ष 01, अंक 01, 15 अप्रैल - 01 मई 2023 | पृष्ठः 16, मूल्यः 21 रुपये



# संस्कृतिः संरक्षणीया चेत् संस्कृतं परिग्रहणीयम



**श्रीः श्रीः 1008 परमहंस–पूज्यसान्दीपेन्द्रजि–महाराजः ( मातृबगलामुखीप्राङ्गणम्, नलखेड़ा, मध्यप्रदेशः ) मुख्यमार्गदर्शकः, रामायण रिसर्च्काउंसिल्** संस्कृतभाषायाः महत्त्वे शङ्काकरणं स्वास्तित्त्वे शङ्काकरणवत् अस्ति, यतोहि यावत् मानवः अस्ति संस्कृतमहत्त्वम् असीमितम् अस्ति। एतत् केवलं वर्तमानभारतभूभागस्य एव आधारशिला नास्ति अपि तु मानवतायाः आधारशिला अस्ति। वर्तमानसमये यदा अपि वयं संस्कृतभाषायाः महत्त्वं समीक्षामहे, तावद् वयम् आङ्ग्लभाषायाः अन्यभाषाणां च समानान्तरम् एतां भाषां संस्थाप्य विचारयामः यत् यथा तद्भाषाज्ञातृभ्यो धनोपलब्धिर्भवति अथ वा वृत्तिः प्राप्यते, तथैव किम् एवम्प्रकारेण संस्कृतज्ञात्रेऽपि लप्स्यते? मम मतम् अस्ति यत् एतत् सम्भवति, किन्तु एतदर्थम् अस्माभिः पदानि वर्धनीयानि। प्रत्येकमपि अपेक्षा प्रशासनेन एव स्यात्, एतत् न सम्भवति। प्रशासनं केवलम् अस्माकं दिग्दर्शनं कारयितुम् अर्हति, कार्यान्वयनम् अस्माभिरेव कर्त्तव्यम्। अस्माकं रुचिं स्वरं च दृष्ट्वा एव प्रशासनं निर्णयं ग्रहीष्यति। वर्तमानप्रशासनं येन प्रकारेण सांस्कृतिकचेतनां प्रति जागरूकम् अस्ति, तत्र संस्कृतं प्रति सकारात्मकनिर्णयाः अपि ग्रहीतुं शक्यन्ते।

नास्ति सन्देहः यत् संस्कृतभाषायाः एतत्पक्षे आगतन्यूनतायाः मुख्याधारः परतन्त्रेतिहासस्य स्वतन्त्रतायाः पश्चात् शासनस्य च त्रुटिः अस्ति। आगम्यताम्, वयं संस्कृते वार्ताः कुर्मः।

## ज्ञानस्य आदिमभाषा

विश्वस्य सर्वप्राचीनतमः उपलब्धग्रन्थः ऋग्वेदः अस्ति। एतत् तथ्यं सर्वमान्यम् अस्ति। मैक्समूल´इत्यसौ अत्र एतावत् कथितवान्, यावत् मानवः स्वीयेतिहासे रुचिं ग्रहीष्यति, यावच्च वयं स्वपुस्तकालयसङ्ग्रहालयेषु प्राचीनयुगस्य स्मृतिचिह्नैः युक्ताः स्मः, तावत् मानवजातेः अभिलेखभरित-पूरितपुस्तकानां पङ्क्तीनां मध्ये प्रथमं पुस्तकम् ऋग्वेदः एव स्थास्यति। अतो मानवजातेः आदिमग्रन्थस्य भाषा अपि आदिमा अस्ति। अर्थात् संसारस्य प्रथमभाषा संस्कृतभाषा अस्ति। भाषया भावानां ज्ञानस्य अभिव्यक्तिः भवति, भाषा स्वैच्छिकवाचिकध्वनिसङ्केतानां तत्पद्धतिः अस्ति, यद्द्वारा मानवसमाजः परस्परं विचारविनिमयं करोति। संस्कृतभाषा अन्यभाषावत् केवलम् अभिव्यक्तिसाधनमात्रम् एव नास्ति प्रत्युत सा मनुष्यस्य सर्वाधिकसम्पूर्णविकासस्य कुञ्जी अपि अस्ति। एतत् रहस्यविन्मनीषिणः प्राचीनकालात् एव संस्कृतं देवभाषाऽमृतवाणी-नाम्ना प्रथयन्ति।

संस्कृतं केवलं स्वविकसितभाषा नास्ति, अपि तु संस्कारितभाषा अस्ति। अतः एतन्नाम संस्कृतम् अस्ति। ऋग्वेदस्य भाषा विश्वस्य भाषिकाध्ययने प्राचीनतमं महत्त्वपूर्णं च स्थानं बिभर्ति। स्वयम् ऋग्वेदे अनेकस्थलेषु भाषातत्त्वस्य गम्भीरसिद्धान्तानां, दार्शनिकचिन्तनस्य, भाषायाः परिशुद्धतायाः, वैज्ञानिकतायाः, सूक्ष्मतायाः च बोधनम् आवश्यकं ज्ञायते।

अतो मानवजातेः आदिस्रोतोग्रन्थं ज्ञातुं संस्कृतमहत्त्वम् अनन्तम् अस्ति। यो जनः ज्ञानस्य आदिस्रोतः न ज्ञातुम् इच्छति, तदर्थं तद्भाषायाः अपि किमपि महत्त्वं न अस्ति।

## संस्कृतेः आधारः

संस्कृतेः अर्थः अस्ति परिमार्जितसंस्कारैः युक्तानां मनुष्याणां सभ्यता। अस्माकम् आत्मा, अस्मिता, भारतस्य च भारतीयता तस्यामेव संस्कृतौ अस्ति, यस्याः प्राणभूता संस्कृतभाषा अस्ति। संस्कृतिः व्यक्तिविकासेन सह आन्तरिकविकासस्य अपि बोधिका अस्ति। एतल्लक्ष्यं व्यक्तिविकासस्य प्रकृतेश्च सन्तुलनम् अस्ति। भाषा संस्कृतिवाहिका भवति। भारतीयसंस्कृतेः समस्तपक्षाणां यथा ऐतिहासिकस्य, आर्थिकस्य, धार्मिकस्य, प्राकृतिकस्य, राजनैतिकस्य, कलायाः, ज्ञानस्य, विज्ञानस्य अन्यस्य च विषयस्य सूक्ष्मं वास्तविकं च ज्ञानं संस्कृतभाषायाः माध्यमेन एव सम्भवति।

## देवतानां भाषा

- देवताशब्दस्य अभिप्रायः अस्ति- ये ददति उत ये प्रकाशवन्तः सन्ति दानाद्वा दीपनाद्वा। विश्वस्य आदिमग्रन्थे प्रकृतेः महत्त्वम् अतिसूक्ष्मतया कथितम् अस्ति। यतोहि मानवास्तित्वं प्रकृतिसामञ्जस्ये एव निर्भरं करोति, ज्ञानं च नैमित्तिकम् अस्ति, मनुष्यः तत्प्रकृतेः शिक्षते। अतः तेषु ग्रन्थेषु सृष्टेः प्रत्येकं तत्पदार्थमात्रम्, यो मनुष्याय किमपि ददाति, देवता उत देव इति कथयित्वा सम्बोधयन्ति। वेदे सृष्टेः दैवीयशक्तीनां मनुष्याय बोधः कारितः अस्ति। तस्य ज्ञानकारणस्य शैली स्तुतिपरा अस्ति। स्तुतिमाध्यमेन वयं कस्यापि पदार्थस्य गुणान् कर्माणि च वदामः। वेदेषु प्रकृतेः, तत्सञ्चालकस्य नियामकस्य च स्वरूपम् उक्तम् अस्ति, यत् प्रत्येकमनुष्येण अवश्यं ज्ञेयम् अस्ति। संस्कृतभाषा देवस्वरूपकथनकारणाद् देवभाषा कथ्यते। प्रकृतेः तन्नियामकस्य च स्वरूपं ज्ञातुं संस्कृतभाषायाः महत्त्वं सर्वदा स्थास्यति।

## शब्दावली

संस्कृतमहत्त्वम् = संस्कृत का महत्त्व, संस्कृतज्ञात्रे= संस्कृत ज्ञाता के लिए, स्मृतिचिह्नैः = स्मृति चिह्नों के द्वारा, आदिस्रोतोग्रन्थम्= पहले स्रोत ग्रन्थ को, परिमार्जितसंस्कारैः = परिमार्जित संस्कारों के द्वारा, अन्यसमस्तविद्यानाम् = अन्य समस्त विद्याओं का, अल्पात्यल्पेषु = कम से बहुत कम में, प्रविधिपराः= प्रविधि/तकनीक-परक, स्वप्रतिवेशिनः= अपने पड़ोसियों को जागरूकान् = जागरूकों को।

## वैज्ञानिक तार्किक क्षमता वर्धिका

संस्कृतभाषायां वैदिकसाहित्याद् अतिरिक्तानाम् अपि अन्यसमस्तविद्यानां, ज्ञान-विज्ञानगतं च बहुसूक्ष्मम् अध्ययनम् उपलब्धम् अस्ति। संस्कृतम् अस्माकं दार्शनिकानाम्, वैज्ञानिकानाम्, गणितज्ञानाम्, कवीनाम्, नाटककाराणाम्, व्याकरणाचार्यादीनां च भाषा आसीत्। एतस्याः माध्यमेन भारतस्य उत्कृष्टतममनीषायाः, प्रतिभायाः, अमूल्यचिन्तनस्य, मननस्य, विवेकस्य, रचनायाः, सर्जनायाः, वैचारिकप्रज्ञायाः च अभिव्यक्तिः जाता अस्ति। व्याकरणस्य क्षेत्रे पाणिनेः पतञ्जलेः च (अष्टाध्यायीमहाभाष्ययोः लेखकौ) समतुल्यः सम्पूर्णविश्वे नान्यः कश्चन द्वितीयः अस्ति। खगोलशास्त्रस्य गणितस्य च क्षेत्रे आर्यभटस्य, ब्रह्मगुप्तस्य, भास्करस्य च कार्यैः मानवजगते नवीनः मार्गः प्रशस्तः। तत्रैव औषधेः क्षेत्रे चरकः सुश्रुतः च महत्त्वपूर्णं कार्यम् अकुरुताम्।

दर्शनस्य क्षेत्रे गौतमः (न्यायव्यवस्थायाः जन्मदाता) शङ्कराचार्यः बृहस्पतिः चेत्यादयः सम्पूर्णे विश्वे विस्तृतां दार्शनिकव्यवस्थां प्रतिपादितवन्तः। एतेषां सर्वे ग्रन्थाः संस्कृतभाषायाः वैज्ञानिकतायाः तार्किकतायाः च द्योतकाः सन्ति यतोहि कस्यापि विषयस्य अल्पात्यल्पेषु शब्देषु सूत्ररूपेण कथनं तस्याः भाषायाः वैज्ञानिकतां कथयति।

संस्कृतभाषा इयती सक्षमा अस्ति यत् अस्यां प्रविधिपराः विचाराः पूर्णतः विशुद्धतया, तार्किकतया सुस्पष्टतया च सह व्यक्ताः कर्तुं शक्यन्ते। विज्ञाने परिशुद्धतायाः आवश्यकता भवति, सहैव विज्ञानाय एकस्याः लिखितभाषायाः अपि आवश्यकता भवति, यस्यां विचाराः पूर्णस्पष्टतया तार्किकतया च सार्धं व्यक्ताः कर्तुं शक्येरन्। संस्कृतस्य अतिरिक्तं विश्वस्य कस्या अप्यन्यस्याः भाषायाः वर्णाः एवंविधेन तार्किकेण वैज्ञानिकेन च रूपेण न स्थापिताः सन्ति। एवं वयं पश्यामः यत् संस्कृतभाषायां लघु-लघुविषयाः कियद्-गम्भीरतया स्वीकृताः सन्ति तावद् दीर्घ-दीर्घविषयेषु कियद्-गहनतया चिन्तनं कृतं स्याद्।

संस्कृतस्य विषये इङ्ग्लैण्ड् इत्यत्रत्यः विद्वान्, एशियाटिक सोसाइटी ऑफ बङ्गाल इत्येतस्या संस्थायाः च फोर्टविलियम् इत्येतस्य न्यायाधीशः स´विलियम् जोन्स् इत्यसौ 1786तमाब्दे उक्तवान् आसीत् यत् संस्कृतभाषायाः प्राचीनता या अपि स्यात्, इयम् एका अद्भुतसंरचना अस्ति। इयं ग्रीक-भाषातः अधिकपरिपूर्णा, लैटिनभाषातः अधिकसमृद्धा, अनयोः च उभयोः अपेक्षया अधिकशुद्धा मनोहारिणी च अस्ति।

रामायण रिसर्च्काउंसिल् इत्येतन अर्थात् रामायणशोधपरिषदा एकं शोभनं कार्यम् आरब्धम् अस्ति। आगच्छन्तु, वयं संस्कृताय संस्कृत्यै च आदौ स्वयं जागरूकाः भवेम पुनश्च स्वप्रतिवेशिनः जागरूकान् कुर्याम।



# साहाय्यं दीयताम्, स्वरूपं परिवर्तनीयम् अस्ति

(लेखकः विजय बघेल,
छत्तीसगढ़स्य दुर्ग-जनपदतः
सांसदः अथ रामायण-वार्ता-
प्रकाशनसमितेः च
अध्यक्षः अस्ति)

भारतं न साधारणः देशः ऋषिमुनीनां हि भूमिः एषा। इयं साधूनां तपस्स्थली अपि। अस्य देशस्य पौराणिकेतिहासं पश्येम चेत् अद्यत्वे जगद् यस्मिन् आविष्कारे गर्वं करोति तम् आविष्कारं वयं सहस्रवर्षेभ्यः पूर्वम् अस्याः धरायाः कृतवन्तः आस्म। अस्माकं वैदिकसंस्कृतौ किं नास्ति परन्तु अद्य वयं कुत्र स्मः? अस्मिन् विषये विचारमन्थनस्य आवश्यकता वर्तते। अस्माकं मातृभाषा हिन्दी इति स्मरामः परन्तु संस्कृतम् ईश्वरस्य भाषा इति किमर्थं न मन्यामहे? किं भवन्तः कदापि चिन्तयन्ति यत् पाश्चात्त्यसंस्कृतिं स्वीकुर्वन्तः वयं क्व आगताः? अस्माकं शिक्षाव्यवस्थायाः नाशार्थं केनचित् विदेशिना षड्यन्त्रं कृतम् आसीत्, किं वयं किमपि स्मरामः? आङ्गलभाषायाः भाषणम् अद्य महान् गौरवविषयः जातः अस्ति। भारते कश्चित् एव स्यात् यः हिन्दीभाषां न जानीयात् परन्तु आङ्लभाषाभाषणस्य अर्थः स्वस्थितिसंवर्धनम् अथ बृहज्जनेषु परिगणनम् इति मन्यते! अपि कदाचिदपि एतादृशः विचारः संस्कृते आगच्छति? यदा बालकानां आङ्गलभाषा शिथिला भवति तदा गृहस्य परिपालकाः कथयन्ति यत् आङ्गलसमाचारपत्रं पठतु, शब्दावलीं च स्मरतु, आङ्गलभाषा शोभना भविष्यति। किं वयं स्वबालकानां संस्कृतं संस्कर्तुम् एतादृशान् परामर्शान् दातुं न शक्नुमः? बालकाः संस्कृतपुस्तकपत्रिकादिकं पठेयुः, किम् एवं सम्भवति? सर्वप्रथमम् अस्माभिः अवगन्तव्यं यद् आङ्गलभाषापठनेन कश्चिद् संस्कारान् शिक्षेत न वा शिक्षेत उत काऽपि अन्या भाषा बालकान् सुसंस्कृतान् कर्तुं न काम् अपि प्रतिज्ञां कुर्यात् न वा, परन्तु देवभाषासंस्कृतपठनेन कस्मिंश्चिद् अपि बालके देवत्वस्य विकासः भवितुम् अर्हति, एतत् तु प्रतिशतं शतम् इत्येवं सुनिश्चितम् अस्ति।

रामायणशोधपरिषद् 'रामायणवार्ता'-माध्यमेन एतादृशम् उपक्रमं प्रारब्धवती, यस्य अन्तर्गतं वयं न केवलं संस्कृतभाषायां (टैब्लॉयड्) पत्रिकां प्रकाशनाय उपक्रमं कर्तुं गच्छामः, अपि तु संस्कृतेन देशस्य संस्कृतेः, लोकपरम्परायाः, ऐतिहासिकरिक्थानां च चर्चा करिष्यते। एतावदेव न, वयं केवलं देवभाषासंस्कृतस्य विषये चर्चां करिष्यामः, संस्कृते भवतः ज्ञानं कथं वर्धयितुं शक्यते इति चर्चां करिष्यामः, प्रथमपृष्ठे वर्तमानविषये विश्लेषणात्मकं लेखं प्रस्तुतं करिष्यामः, परन्तु संस्कृतभाषायाम्। वयं रामस्य रामायणस्य च विषये चर्चां करिष्यामः, भवतां पुरतः देशस्य कथावाचकानां परिचयम् आनेष्यामः, या रामायणी अस्ति, तस्याः अपि चर्चां करिष्यामः, किन्तु संस्कृतभाषायाम्। वयं जानीमः यत् भवान् चिन्तयन् स्याद् यत् संस्कृतं कः अवगमिष्यति, उत्तरम् अस्ति यत् वयं प्रत्येकपृष्ठस्य अधः प्रमुखां शब्दावलीं लेखिष्यामः, यया भवान् सरलतया पठितुं शक्ष्यति। यदि भवान् स्वयमेव पठितुम् आरभते तर्हि निस्सन्देहं भवतः बालकाः अपि एतम् अभ्यासम् आरब्धुं शक्नुवन्ति।

आङ्किकीयप्रौद्योगिक्याः वर्धमानवातावरणे वयं विषयान् इमान् अन्तर्जालरूपेण अपि आनयामः। ramayanvarta.com इति अन्तर्जालफलकेन भवन्तः ई-पत्रिकां पठितुम् अर्हन्ति, सहैव एतत्फलके संस्कृतभाषायाम् आलेखान् अपि प्राप्तुम् अध्यन्तर्जालं च पठितुं शक्नुवन्ति। उद्देश्यम् अस्ति यद् भारतीयायां यस्यां गौरवगाथायां समस्तम् अपि विश्वं गर्वं करोति स्म, तां गौरवगाथां वयं पुनरानेतुं समन्वितं लघुप्रयासं कर्तुं गच्छामः, केवलं भवतः साहाय्यम् अपेक्षते। बहुवारं वयं चिन्तयामः यत् अस्माभिः द्वित्रैः अभिलषितेन किं भवेत् ! परन्तु सत्सङ्गमे वयं शिक्षितवन्तः यत् यदि अस्माभिः जगति किमपि परिवर्तनम् आनेतुम् इष्यते तर्हि जगति परिवर्तनं न आनीयेत अपि तु स्वस्मिन् एव परिवर्तनम् आनीयेत, तद् अभियानं विधीयेत तदा शनैः शनैः एतद् विश्वम् अनुसरति। अस्य कारणम् अस्ति यत् एतस्मै संसाराय केवलाः नेतृत्वकर्तारः अपेक्षन्ते, जनसम्मर्दः स्वयमेव सम्पद्यते। एकः महान् साधुः अस्मान् कुटुम्बस्य अभिप्रायं बोधितवान् यद् यथा वयं स्वगृहाय कुटुम्बाय च चिन्तयामः तथैव तेभ्यः विचारेभ्यः किञ्चित् समयं गृहीत्वा समाजाय, राज्याय, राष्ट्राय, संसाराय च कतिपयक्षणानि चिन्त्येत। यथा वयम् एकछदेरधः वसामः, केचन सदस्याः परिवार-पदवाच्याः भवन्ति, तथैव प्रदेशः परिवारत्वेन अवगम्यते, यदा प्रदेशप्रमुखस्य एकेनापि निर्णयेन अस्माकं गृहेषु, परिसरस्य च आर्थिक-सामाजिक-राजनैतिक-नैतिक-मूल्येषु सकारात्मको नकारात्मको वा प्रभावः भवति। वयं पुरतः तत्प्रशासनं प्रति निर्णयग्रहणस्थितिं प्राप्नुमः यत् अयम् अस्माकं अग्रिमः प्रमुखः भवेत् वा न वा इति तथैव एतत् राष्ट्रेऽपि प्रवर्तते। कथनस्याभिप्रायः यदस्मासु प्रत्येकेन अस्माकं समाजः, प्रदेशः, राष्ट्रं च अस्ति, अत एव प्रारम्भोपक्रमः स्वतः स्यात् तर्हि बहुसुन्दरं निर्णायकं च भवेद्। अत एव अद्य आवश्यकता उत्पन्ना यतोहि अस्माकं देशः यः सुसंस्कृतः आसीत्, सः अद्य अन्तर्जालस्य प्रसारेण सह अश्लीलतायाः गर्तं प्रविशति। आधुनिकीकरणस्य नामधेयेन सर्वे पाश्चात्त्यं स्वीकुर्वन्ति। अश्लीलता चरमस्थाने अस्ति । परिवारेण सह उपविश्य किं शाकल्यं द्रष्टव्यम्, किं न द्रष्टव्यम्, इति चिन्ता वर्धमाना अस्ति, यतः शाकल्यमध्ये विज्ञापनगता अपि अश्लीलता चिन्ताकरी। एवं सति अस्माभिः पादपवत् बालकाः सेचनीयाः इत्यावश्यकम्। देवभाषां प्रति तेषाम् आकर्षणविधानम् आवश्यकं वर्तते। ते प्रोत्साहिनः कर्तव्याः स्युः। केषाञ्चित् पौराणिकग्रन्थानाम् अध्ययनं कारयितव्यं स्याद्। रामस्य, रामचरितमानसस्य, रामायणस्य च अभिप्रायः बोधितव्यः स्याद्। अस्माभिः अस्माकं सांस्कृतिकरिक्थबोधोऽपि तेभ्यः कथयितव्यः स्याद्। तेभ्यः क्रीडाकाले एतादृशाः शिक्षाप्रदविषयाः बोध्याः स्युः, यैस्तेषु संस्कारविकासः सम्भवेद्।

वर्तमाने आ.एन्.आई. इत्यत्र लक्षाधिकानि समाचारपत्राणि हिन्द्याङ्गलभाषयोः पञ्जीकृतानि सन्ति किन्तु तत्रैव देवभाषासंस्कृते शतसमाचारपत्राण्यपि न सन्ति पञ्जीकृतानि, यतोहि अस्मिन् नैकानि समाह्वानानि, पाठकाश्च स्वल्पाः, विज्ञापनानि च शून्यप्रायाणि सन्ति। एवं सत्यपि रामायणशोधपरिषद् भवतः, देशस्य, सनातनस्य च कृते ... रामायणवार्ताः प्रस्तूय एकम् उपक्रमारम्भं कृतवती अस्ति, एतस्य सफलता तदा एव स्वीकरिष्यते यदा भवन्तः साहाय्यं विधास्यन्ति। साहाय्यं दीयताम्, वयं संस्कृतिस्वरूपं परिवर्तितुं प्रस्थिताः स्मः।

### शब्दावली

शिक्षाव्यवस्थायाः= शिक्षा व्यवस्था की, स्वस्थितिसंवर्धनम् = अपनी स्थिति का संवर्धन, परिपालकाः = परिपालन करने वाले, आङ्गलभाषापठनेन = अंग्रेजी भाषा के पढ़ने से, देवभाषासंस्कृतपठनेन = देवभाषा संस्कृत के पढ़ने से, ऐतिहासिकरिक्थानाम् = ऐतिहासिक विरासतों का, आङ्किकीयप्रौद्योगिक्याः = डिजिटल प्रौद्योगिकी का, अध्यन्तर्जालम् = इन्टरनेट् पर/ ऑनलाइन, द्वित्रैः = दो-तीन के द्वारा, एकछदेरधः = एक छत के नीचे

## रामायणस्य दश विचाराः

# ये भवन्तं सर्वदा स्थापयिष्यन्ति अन्येभ्यः अग्रे



रामचरितमानसे भगवतः श्रीरामस्य चरित्रचित्रणं यथा प्रभावपूर्णविधिना कृतम् अस्ति तथैव प्रभावपूर्णविधिना भगवतः रामस्य माध्यमेन जीवनं जीवितुं पद्धतिः कथिता अस्ति। रामचरितमानसे मनुष्यः उक्त : यत् यदि जीवनं सफलं सुखपूर्णं च करणीयं चेत् तेन रामभजनेन सह लौकिकव्यवहारः अपि ध्यातव्यः।

(लेखकः चन्द्रशेखर मिश्रः
रामायणवर्तस्य सम्पादकः अस्ति

**नाथ दैव कर कवन भरोसा। सोषिअ सिंधु करिअ मन रोसा।**

**कादर मन कहुँ एक अधारा। दैव दैव आलसी पुकारा।।**

- रामचरितमानसस्य एतत् चौपाई–पद्यं तस्य कालस्य उल्लेखं करोति, यदा भगवान् रामः समुद्रात् समुद्रं तरितुं मार्गं याचितुं ध्यानाय गच्छति स्म। तदा लक्ष्मणः भगवन्तं रामं तस्य शक्तिं सामर्थ्यं च स्मारयन् अवदत् यत् भवान् स्वयमेव एतावान् शक्तिशाली अस्ति यत् एकेन बाणेन समुद्रं शोषयितुं शक्नोति तर्हि समुद्रात् अनुनयः विनयः किमर्थम्? भगवान् रामः एतत् सर्वं जानाति स्म किन्तु तदापि सः शक्तितः पूर्वं शान्तिपूर्वकं परिस्थितिसमाधानाय प्रयतते स्म । तेन ज्ञापितं यत् शक्तिमता संयमिना भाव्यमित्यपि अनिवार्यम् । भवान् स्वविश्वासेन कार्यं करोतु, ईश्वरः स्वयम् एव भवतः साहाय्यं करिष्यति।

**बोले बिहसि महेस तब ग्यानी मूढ़ न कोइ।**

**जेहि जस रघुपति करहिं जब सो तस तेहि छन होइ।**

- रामचरितमानसस्य बालकाण्डे भगवतः विष्णोः रामावतारस्य कारणम्, भगवतः लीलायाः उद्देश्यं च बोधयन् शिवः वदति – कश्चन अपि एतस्मिन् भ्रमे न तिष्ठेत् यत् सः सर्वज्ञः उत कश्चित् सदा मूर्खः स्थास्यति इति। ईश्वरः यदा यद् इच्छति, तदा सः प्रत्येकं जीवं तथैव करोति। अत एव कदापि कस्यापि वस्तुनः अहङ्कारः न कर्तव्यः, ये अहङ्कारं कुर्वन्ति, ते समाजे कदापि अग्रे गन्तुं न शक्नुवन्ति।

**काम, क्रोध, मद, लोभ, सब, नाथ नरक के पंथ।**

**सब परिहरि रघुबीरहि, भजहुँ भजहिं जेहि संत।**

- विभीषणः रावणं पापमार्गे अग्रे गमनात् निवारयितुं बोधयति यत् कामक्रोधाहङ्कारलोभादयः नरकमार्गे नयन्ति। यथा कामवशिना त्वया सीता अपहृता, अथापि यो बलाहङ्कारस्ते जायते, सः तव विनाशस्य मार्गः अस्ति। यथा साधवः सर्वं त्यक्त्वा भगवतः रामस्य नाम जपन्ति तथा त्वया अपि रामस्य भवितव्यम् । मनुष्यः इहलोके परलोके च सुखशान्तिप्रगतिभ्यः एभ्यः पापपथं नीयमानेभ्यः तत्त्वेभ्यः आत्मानं रक्षेत् ।

**जे न मित्र दुख होहिं दुखारी। तिन्हहि बिलोकत पातक भारी ।**


**निज दुख गिरि सम रज करि जाना। मित्रक दुख रज मेरु समाना ।**

- रामचरितमानसे भगवतः रामस्य सुग्रीवस्य च मैत्रीसन्दर्भे एतत् चौपाई–पद्यं मनुष्याय ज्ञानं ददाति यत् मैत्रीनिर्वाहयतः भगवान् अपि साहाय्यं करोति। ये जनाः मित्राणाम् उत अन्येषां दुःखं दृष्ट्वा दुःखं न अनुभवन्ति, तेषां जनानां साहाय्यं न कुर्वन्ति, तादृशानां जनानां दर्शनेन अपि पापं जायते। ये स्वदुःखं विस्मृत्य परोपकारं कुर्वन्ति, ईश्वरः स्वयं तेषां साहाय्यं करोति।

**आगें कह मृदु बचन बनाई। पाछें अनहित मन कुटिलाई।**

**जाकर चित अहि गति सम भाई। अस कुमित्र परिहरेहिं भलाई ।**

- किष्किन्धाकाण्डे श्रीरामेण मित्राणां लक्षणं कथितम् अस्ति। सः अवदत् यत् सुमित्रं जीवने महती उपलब्धिः इत्येव। चौपाई–पद्ये अग्रे लिखितं यत् यः पुरतः मृदुवचनं वदति, पृष्ठतः ईर्ष्यति, अभद्रं च ब्रूते, तादृशेभ्यः जनेभ्यः सदा दूरे भाव्यम्, यतः एते स्वार्थिनो भवन्ति। भगवान् रामः अनुजं लक्ष्मणं वदति यत् हे अनुज! यस्य मनः सर्पस्य गतिः इव कुटिलम् अस्ति, एतादृशकुमित्रस्य त्यागः एव श्रेयान। सुहृद् सर्वदा स्पष्टतरं वदति। सः भवन्तं सम्यक् परामृशति। मित्रतायां परस्परं मुक्तहृदयपूर्वकं भाव्यम् ।




**मोह सकल ब्याधिन्ह कर मूला। तिन्ह ते पुनि उपजहिं बहु सूला ।**

**काम बात कफ लोभ अपारा। क्रोध पित्त नित छाती जारा ।।**

- सर्वेषां रोगाणां मूलं मोहः (अज्ञानम्)। पुनः अयम् अपि रोगः अनेकान् अधिकशूलान् जनयति । यथा कामः वातः, लोभः, अपारः (वृद्धः) कफः अस्ति, क्रोधः पित्तम्, यः सदा वक्षःस्थलं दहति। एतादृशाः जनाः जीवने किमपि कर्तुं न शक्नुवन्ति। सदैव अग्रे गन्तुम् एतानि वस्तूनि त्यक्तव्यानि भवन्ति ।

**नहिं दरिद्र सम दुख जग माहीं। संत मिलन सम सुख जग नाहीं ।**

**पर उपकार बचन मन काया। संत सहज सुभाउ खगराया ।**

- जगति दरिद्रतावत् अर्थात् निर्धनतावत् नास्ति दुःखम्, न सत्समागमवत् लोके सुखम्। यतोहि मनसा वचसा वपुषा च परोपकरणं साधूनां सहजः स्वभावः। महान्तः साधु–सज्जनाः भवद्भ्यः सद्विचारान् ददति, यैः भवन्तः समाजस्य हिताय कार्यं कुर्वन्ति।

**सुनहु भरत भावी प्रबल, बिलखि कहेहुँ मुनिनाथ ।**

**हानि, लाभ, जीवन, मरण,यश, अपयश विधि हाँथ ।।**

- यद्यपि लाभालाभौ जीवनमरणे च ईश्वरस्य हस्ते सन्ति परन्तु हानेः पश्चात् अस्माभिः पराजयं स्वीकृत्य न उपविश्येत। एते अस्माकम् एव हस्ताः सन्ति। लाभं वयं शुभलाभेन परिवर्तयेम, एतदपि जीवनस्य एव अधिकारक्षेत्रे आगच्छति। जीवनं यावद् अपि लभ्येत, तत् कथं जीवितव्यम्, तत् केवलं जीवः अर्थात् वयम् एव निर्णयं कुर्मः, यदि मृत्युः प्रभोः हस्ते अस्ति, तर्हि तस्य परमेश्वरस्य स्मरणं अस्माकं स्वहस्ते अस्ति।

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण! रोचते।**

**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।**

- भगवान् रामः अनुजं लक्ष्मणं वदति यत् सम्पूर्णा लङ्कानगरी ऊर्ध्वतः अधः यावत् स्वर्णेन भूषिता तथापि लक्ष्मण! मह्यं सर्वथा नैषा रोचते। मह्यं तु जननी जन्मभूमिश्च स्वर्गात् अधिकं मूल्यं स्थापयतः। अस्मात् पद्यात् वयं शिक्षां प्राप्नुमः यत् यः जनः स्वजन्मभूसम्बद्धः तिष्ठति, सः तत्रत्यानि मूल्यानि अग्रे नयति। सः अन्येभ्यः अग्रे तिष्ठति।

### शब्दावली

शोषयितुम् = सुखाने के लिए, परिस्थितिसमाधानाय = परिस्थिति के समाधान के लिए, शक्तिमता = शक्तिमान् के द्वारा, सुखशान्तिप्रगतिभ्यः = सुख शान्ति व प्रगति के लिए, दरिद्रतावत् = दरिद्रता के समान, निर्धनतावत् = निर्धनता के समान, ऊर्ध्वतः = ऊपर से, तत्रत्यानि = वहां के



# रामः रामायणं च- भारतीय सांस्कृतिक परम्परायाः अभिव्यक्ती

रामः रामायणं च, भारतस्य सांस्कृतिकपरम्परायाः न केवलम् अभिन्नत्वेन, अपि तु महत्त्वपूर्णाङ्गत्वेन अपि स्तः । अयोध्यायां रामजन्मभूमौ भव्यमन्दिरनिर्माणस्य आन्दोलनं यदा 1983तमे वर्षे एकदा पुनः प्रारब्धं तदा अनेके समीक्षकाः रामरामायणयोः विषये अनेकान् प्रश्नान् कृतवन्तः । परन्तु वास्तविकता एषा यत् रामः रामायणं च सम्पूर्णं दक्षिणैशियाक्षेत्रम् एकस्यां सांस्कृतिकपरम्परायां बध्नाति। न केवलेषु थाईलैण्ड-कम्बोडिया-वियतनामेण्डोनेशिया-लाओस-म्यांमार-नेपाल-देशेषु, अपि तु राम-रामायणयोः प्रभावः उपस्थितिः च सिङ्गापुर-मलेशिया-देशयोः अपि अस्ति ।

वाल्मीकिरामायणस्य आङ्गलभाषायाम् अनुवादं कृत्वा 1895तमवर्षे विद्वान् राल्फ़.टी. इत्यसौ प्रकाशितवान। एच.ग्रिफिथ् इत्यस्य अनुसारेण एतद् एवंविधं महाकाव्यं यद् भारतस्य आरक्तं समाहितम् अस्ति। भारतस्य प्रत्येकजनस्य स्मृतौ स्थायिरूपेण अङ्कितम् अस्ति एतत् । यत्र यत्र रामः गतवान्, तानि तानि सर्वाणि स्थानानि प्रसिद्धानि अभवन्। शताब्दीभ्यः जनाः श्रीरामं निरन्तरं स्मरन्ति। तादृशव्यक्तित्वविषये लिखितं महाकाव्यं कथं काल्पनिकं कथयितुं शक्यते?

एतदेव अभिमतम् इटलीदेशस्य प्राच्यविद्याविदः गस्प 'गोरेसिओ (1808-1891) इत्यस्य अपि अस्ति । गोरेसिओ इत्यनेन वाल्मीकिरामायणस्य इटालियनभाषायाम् अनुवादः कृतः। तस्य मतम् अस्ति - इयं रचना तादृशघटनासु आधारिता अस्ति, यया हिन्दूजनमानसपटले एतावान् गभीरः प्रभावः कृतः यः कदापि विस्मर्तुं न शक्यते।

अन्यः विद्वान् एफ.ई.पारगिर्टइत्यसौ 'द ज्योग्रॉफी ऑफ रामाज् एक्जाइल' इत्याख्ये ग्रन्थे (1894) भौगोलिकदृष्ट्या तैः स्थानैः सम्बद्धसूचनानां समीक्षां कृतवान्, यत्र वाल्मीकिरामायणस्य अनुसारं भगवान् रामः वनवासकाले गतवान् । पार्गिर्टइत्यस्य निष्कर्षः अस्ति यत् वाल्मीकिरामायणे दत्ताः सूचनाः सर्वथा तथ्यपूर्णाः सन्ति यतोहि एतेषु स्थानेषु अगत्वा एतादृशी समीचीना सूचना दातुं न शक्यते।

स्वामिविवेकानन्दस्य कथनम् अस्ति यत् रामायणं महाभारतं च प्राचीनस्य आर्यजीवनस्य ज्ञानस्य च विश्वकोशत्वेन स्तः। मैक्डोनाल् इत्यस्य मते विश्वस्मिन् विश्वे रामायणवत् साहित्यिकरचना अन्या नास्ति, यया जनमनांसि एतावत् प्रभावितानि स्युः।

इतिहासकाराः अपि एतदेव मन्यन्ते यत् श्रीरामः यत्र यत्र गतवान् तत्र तत्र मन्दिराणि तस्य यात्रायाः स्मृतिं रक्षितुं निर्मितानि। अत एव रामायणस्य तथ्यात्मकतायां प्रश्नः न तर्कसङ्गतः। इतिहासविदुषी नन्दिता कृष्णन् एतेषां स्थानानां सांस्कृतिकमहत्त्वं रेखाङ्कितं कुर्वन्ती कथयति - श्रीरामः यत्र यत्र गतवान् तत्र तत्र तस्य स्मृतिः अद्यापि तथैव अस्ति, यथा सः ह्यः एव आगतः स्यात। भारते कालः सापेक्षः इति मन्यते । अत एव केषुचित् स्थानेषु तस्य स्मृतौ मन्दिराणि निर्मितानि। अन्यस्थानेषु च एताः यात्राः, श्रीरामस्य च स्मृतिः लोकपरम्परायाः अभिन्नाङ्गत्वेन अभवताम्। यदि साहित्यम्, पुरातत्त्वम्, स्थानीयपरम्पराः च एकस्मिन् सूत्रे गुम्फितानि दृश्यन्ते तर्हि तस्य विषये कस्य अपि आपत्तिः किमर्थं स्यात् ? भारतीयवैदिकपरम्परायाः गभीरः अध्येता स्टीफन् नैप् इत्यसौ कथयति - श्रीरामस्य स्मृतिः अद्य अपि तावती एव दृढा विद्यते यतोहि तस्य जीवनं शासनकालश्च असाधारणे आस्ताम्। तस्य शासनकाले शान्तिः प्रचुरसमृद्धिः च आस्ताम्, अतः अद्य रामराज्यं सुशासनस्य सन्दर्भबिन्दुः मन्यते ।

आधुनिकसन्दर्भग्रन्थेषु पश्यामः तर्हि सूर्यवंशिश्रीरामस्य इतिहासः फैजाबाद-गजेटियर-राजपत्रस्य त्रिचत्वारिंशत्खण्डस्य पञ्चमाध्यायस्य आरम्भे दत्तः अस्ति। किन्तु वाल्मीकिरामायणानुसारं श्रीरामस्य जन्म अद्यप्रभृति प्रायः 9350वर्षपूर्वम् अयोध्यायाः तस्मिन् एव स्थाने अभवद् यत् रामजन्मभूमिः इति कथ्यते। 1992 तमे वर्षे दिसेम्बर-मासस्य 06 दिनाङ्के बाबरी-संरचनायाः ध्वंसानन्तरं मन्दिरसम्बद्धैः 265 अवशेषैः सह महत्त्वपूर्णः शिलालेखः अपि प्राप्तः । अनेन शिलालेखेन एतद् अपि सिद्ध्यति यत् अद्य हिन्दवः यां रामजन्मभूमिं मत्वा यत्र मन्दिरनिर्माणाग्रहं कुर्वन्ति श्रीरामजन्मस्थानं तत्रैव अस्ति।

श्रीरामः 'मर्यादापुरुषोत्तम'-रूपेण स्वजीवनं यापितवान्। तस्य जीवनस्य सत्यघटनाधृतकथा ऋषिवाल्मीकिना 'रामायण'-माध्यमेन संस्कृतेन कथिता । पश्चात् तुलसीदासः एतस्याः कथायाः आधारेण रामचरितमानसं समेत्य अन्यान् ग्रन्थान् रचितवान्, लोकस्मृतौ भारतीयमानसे च इमाम् इतोऽपि गभीरतया अङ्कितवान्। सामाजिके व्यक्तिगते च जीवने आदर्शस्थापनाय मूल्यानि च स्थापयितुम्, संवर्धयितुम्, संरक्षितुं च भारतीयजीवनपरम्पराकेन्द्रे निर्विवादे श्रीराम-रामायणे स्तः। न काचिद् भारतीया उत अन्या प्रमुखवैदेशिकी भाषा स्याद् यस्यां रामायणानुवादः न जातः। विगत-300वर्षेषु न केवलं भारते, अपि तु सम्पूर्णविश्वे श्रीराम-रामायणयोः विषये गहनशोधकार्यं अभवत। यस्य निष्कर्षः अस्ति यत् श्रीरामः भारतीयसांस्कृतिकपरम्परायाः प्रखरतमाभिव्यक्तिः अस्ति। न केवलं सः अवताररूपेण अपि तु एवंविधप्रबुद्धमूल्यपरम्परायाः प्रतिनिधित्वेन राजते यं समस्तं जगत् सम्मानभावनया गर्वेण च पश्यति। तस्य कयाचिद् विशिष्टपूजापद्धत्या विशेषसमाजेन वा सह सम्बद्धं कृत्वा दर्शनम्, रामायणसदृशग्रन्थं सङ्कीर्णदृष्ट्या कल्पनाकाशोड्डयनमात्रस्य स्वीकरणं भारतस्य समृद्धसांस्कृतिकपरम्परया सह महान् अन्यायः भविष्यति।

### शब्दावली

भव्यमन्दिरनिर्माणस्य = भव्य मन्दिर निर्माण का, हिन्दूजनमानसपटले = हिन्दू लोगों के मानस-पटल में, गभीरः = गम्भीर, समीचीना = अच्छी, त्रिचत्वारिंशत्खण्डस्य = तेतालीसवें खण्ड का, लोकस्मृतौ = लोगों की स्मृति में, प्रखरतमाभिव्यक्तिः = सबसे प्रखर अभिव्यक्ति, विशिष्टपूजापद्धत्या = विशिष्ट पूजा-पद्धति के द्वारा, सङ्कीर्णदृष्ट्या = संकीर्ण दृष्टि के द्वारा, कल्पनाकाशोड्डयनमात्रस्य = कल्पना के आकाश में उड़ने मात्र का

# भारतीयं लोकनाट्यम



*भारते नाटकपरम्परा प्राचीनकालात् एव प्रचलति। भरतमुनिः (ई.पू.तृतीयशताब्द्याम्) अस्य विषयस्य विस्तृतं वर्णनं स्वनाट्यशास्त्रे कृतवान् अस्ति। एतदतिरिक्त’ धन’यकृते ‘दशरूपके’ कविराजविश्वनाथरचिते ‘साहित्यदर्पणे’ अपि बहुमूल्यसामग्री प्राप्यते परन्तु नाट्यशास्त्रम् एव नाट्यविद्यायाः मौलिकस्रोतोग्रन्थः मन्यते।*

## ऐतिह्यम् उद्भवश्च

- नाट्यशास्त्रवर्णितकथया ज्ञायते, देवानां प्रार्थनया ब्रह्मणा सर्वेषां मनुष्याणां मनोरञ्जनाय नाटकस्य रचना कृता। शूद्राणां कृते वेदपठन-पाठनाधिकारः निषिद्धः आसीत्, अतः पञ्चमवेदस्य (नाट्यस्य) रचना अत्यावश्यकी प्रतीता। एवं सर्वेषां वर्णानां मनोरञ्जनाय ब्रह्मा ऋग्वेदात् पाठ्यम्, सामवेदात् गानम्, यजुर्वेदात् अभिनयम्, अथर्ववेदात् रसं च गृहीत्वा नाट्यवेदस्य सृष्टिं कृतवान् –

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसमथर्वणादपि।। नाट्यशास्त्रम् 1/17,18

वस्तुतः नाटकानाम् ‘आग्रहः’ सार्वजनीनः वर्तते । अत एव कालिदासः सम्यक् एव लिखितवान् यत् नाटकं विभिन्नप्रकारकरुचिमतां कृते मनोरञ्जनस्य अद्वितीयसाधनम् अस्ति –

नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम।

अस्मिन् देशे मुस्लिमप्रशासनस्य प्रतिष्ठायाः पश्चात् राजनैतिकैकसूत्रता विनष्टा। मुस्लिमशासकानां प्रवृत्तिः नाट्यकलाविषये उदासीना आसीत। परिणामतः तेषां शासने नाटकरचनायाः, तदभिनयस्य च ह्रासः आरब्धः। राजाश्रयाभावे एतस्य पतनं स्वाभाविकम् एव आसीत। संस्कृतसाहित्यस्य नाट्यपरम्परा, या सहस्रवर्षेभ्यः अविच्छिन्नरूपेण प्रवाहमयी आसीत्, सर्वकालाय नष्टा अभवत।

उत्तरवर्तिभारते भक्त्यान्दोलनप्रवर्तकः गोस्वामिवल्लभाचार्यः आसीत। अयं कृष्णभक्तेः प्रचुरप्रचारं कृतवान। एतस्य अनुयायिनः भागवतस्य दशमस्कन्धस्य कथाम् – यस्यां भगवतः श्रीकृष्णस्य जीवनचरितं वर्णितम् अस्ति – अभिनयमाध्यमेन जनानां पुरतः जीवद्रूपं दत्तवन्तः। श्रीकृष्णस्य बाललीलानाम् अभिनयः मन्दिरेषु, मठेषु अन्यस्थानेषु च आरब्धः, यं द्रष्टुं श्रद्धालवः सहस्रसङ्ख्याकाः समागन्तुम् आरब्धवन्तः। भगवच्छ्रीकृष्णस्य एषा एव प्रारम्भिकलीला अग्रे गत्वा ‘रासलीला’-रूपं गृहीतवती, या अद्यापि मथुरा-वृन्दावनयोः अतिप्रेम्णा क्रियते (रामलीला)।

भारतस्य उत्तरवर्तिभागे रामभक्तिप्रचारस्य श्रेयः स्वामिरामानन्दाय प्राप्तम् अस्ति परन्तु रामभक्तेः पूर्णप्रतिष्ठा एतच्छिष्यगोस्वामितुलसीदास-द्वारा अभवत। सामान्यजनेषु कृष्णभक्तेः प्रचारस्य यत् श्रेयः महात्मसूरदासाय प्राप्तः अस्ति, रामभक्तेः प्रचारस्य तस्माद् अधिकश्रेयः गोस्वामिने वर्तते।

उत्तरवर्तिभारते रामलीलाप्रचारः गोस्वामितुलसीदासस्य देयमात्रम् अस्ति। गोस्वामी सर्वप्रथमं काश्यां रामलीला-करणं प्रारब्धवान। एवं भक्त्यान्दोलनस्य प्रभावेण उत्तरप्रदेशे द्वयोः लोकधर्मि-नाट्यपरम्परयोः जन्म अभवत् – (1) रासलीलायाः (2) रामलीलायाः च।

एतस्मिन् एव काले बङ्गप्रदेशे चैतन्यमहाप्रभुः प्रादुर्भूतः, यः अस्मिन् प्रान्ते कृष्णभक्तिं बहुशः प्रचारितवान। श्रीचैतन्यः भगवत्कृष्णस्तुतेः गानकाले आत्मलीनः भवति स्म। सः भगवदाराधनाकाले कीर्तनम् अपि करोति स्म। सः अनेकतीर्थस्थानानां यात्रां कृतवान्, यत्र एतदनुयायिनः अपि सम्मिलन्ति स्म। शनैश्शनैः एतद्यात्राकीर्तनैः लोकनाट्यरूपं धृतम्, यस्मिन् श्रीकृष्णलीलानाम् अभिनयमाध्यमेन प्रदर्शनम् आरब्धम् । अद्य बङ्गप्रदेशे यात्रायाः कीर्तनस्य च प्रचुरः प्रचारः अस्ति। एवम् उत्तरवर्तिभारते अनेकलोकनाटकानि विकसितानि, येषां पृष्ठभूमिः धार्मिकी आसीत् ।

## कानिचित् प्रसिद्धलोकनाट्यानि

- भारतस्य विभिन्नराज्येषु विभिन्नप्रकारकलोकनाट्यानि प्रचलितानि सन्ति। उत्तरवर्तिभारते प्रचलितायाः रामलीलायाः रासलीलायाः च चर्चा प्राग् एव कृता अस्ति।

मध्यप्रदेशे विशेषतः मालवाप्रान्ते ‘माँच’-नामकं लोकनाटकं प्रसिद्धम् अस्ति। माँच-शब्दः मञ्चशब्दस्य अपभ्रंशरूपः। राजस्थाने ‘माँच’ इत्येतत् ‘ख्याल’ इति रूपेण प्रचलितम् अस्ति। अस्य आरम्भः 19शताब्द्याः उत्तरार्धात् मन्यते। मालवायां माँच-इत्येतेषां परम्परा निर्बाधतया प्रचलति। उत्तरप्रदेशस्य पश्चिमवर्तिजनपदेषु नौटङ्की इत्येतस्याः प्रचारः प्रथितः। हाथरसस्य नौटङ्की इत्येषा अतीव प्रसिद्धा अस्ति। एषा एव ‘स्वाँग’ ‘उत ‘भगत’ इत्यपि कथ्यते। आगरायां ‘भगत’-नामक-लोकनाट्यस्य प्रचुरः प्रचारः अस्ति। ब्रजमण्डले मुक्तरङ्गमञ्चे ‘भगत’-इत्यस्य नौटङ्की-इति-रूपेण अभिनयः क्रियते। एतस्य प्रदेशस्य पूर्ववर्तिजनपदेषु ‘बिदेसिया’ इति नाटकम् अतीव लोकप्रियम् अस्ति, यद् द्रष्टुं सहस्राधिकजनाः एकत्रिताः भवन्ति।

## यात्रा (जात्रा इति)

- बङ्गालस्य ‘यात्रा’ धार्मिक-लोकनाट्यम। ‘गम्भीरा’ इति लोकनाट्यस्य द्वितीयरूपम्, यद् अस्मिन् राज्ये प्रचलितम् अस्ति। एतन्नाटकं शैवसम्बद्धम। महाराष्ट्रे तमाशा-ललित-गोन्धल-बहुरूपिया-दशावतारादीनि लोकनाट्यानि मराठी-रङ्गमञ्चाधारितानि। ‘तमाशा’-इत्येतत् महाराष्ट्रस्य प्राचीनं लोकनाट्यम। एतन्नाटयतां दलनाम ‘फड़’-इति कथ्यते। ‘ललित’-इत्येतत् मध्ययुगीनं धार्मिकनाट्यम्। एतन्नवरात्रिसम्बद्धं विशिष्टकीर्तनम्, यस्मिन् भक्तानां ‘स्वाँग’ इत्यादिकं प्रदर्श्यते। गोन्धल-इत्येतत् धर्ममूलकं लोकनाट्यम। महाराष्ट्रे अस्य आनुष्ठानिकं महत्त्वम् अस्ति। विवाहाद्युत्सवेषु गोन्धल-इत्येतस्य अभिनयस्य व्यवस्था क्रियते।

## यक्षगानम्


- ‘यक्षगान’-इत्येतत् दक्षिणवर्तिभारतीयलोकनाट्यस्य सः विधिः, यः तमिल-तेलुगु-कन्नड़-भाषाभाषि-क्षेत्रस्य ग्रामीणजनेषु प्रचलितः अस्ति। तेलूगुभाषायां ‘वीथि’ उत ‘वीथि-भागवतम्’ इत्युच्यते। यक्षगान-इत्येतत्परम्परा अतिप्राचीना। एतत् नृत्यनाट्यम् (डांस ड्रामा) अस्ति, यस्मिन् गीतसंवादप्रयोगः भवति। अत्र वर्णनप्राधान्यं भवति। अस्य कथावस्तु रामायणात्, महाभारतात्, भागवतात् वा गृह्यते।

## वीथि-नाटकम्

- ‘वीथिनाटकम’ उत ‘वीथि-भागवतम’ इत्येतत् तेलूगुलोकनाट्यम। ‘वीथिनाटकम’ इत्यस्य शाब्दिकार्थः अस्ति तन्नाटकं यन्मार्गे प्रदर्शयितुं शक्येत। अस्मिन्नाटके पात्राणाम् एकः द्वौ वा मञ्चे आगच्छतः। स्त्रियः सामूहिकरूपेण नृत्यन्ति। नृत्याभिनयाभ्यां कृष्णलीला ‘वीथिनाटकम’ इत्यस्य विषयीक्रियते। एवं भारतस्य विभिन्नराज्येषु लोकनाट्यानि प्रचलितानि सन्ति, यानि अतीव लोकप्रियाणि।

### शब्दावली

विभिन्नप्रकारकरुचिमताम् = विभिन्न प्रकार की रुचियों वालों की, भगवदाराधनाकाले = भगवान् की आराधना के काल में, निर्बाधतया = निर्बाध रूप से, पश्चिमवर्तिजनपदेषु = पश्चिमी जिलों में, सहस्राधिकजनाः = हज़ार से अधिक लोग, विवाहाद्युत्सवेषु = विवाह आदि उत्सवों में , नृत्याभिनयाभ्याम् = नृत्य और अभिनय के द्वारा




# भारतं तपस्वीनाम् ऋषीणां च भूमिः, एवंविधः एव तपस्वी आसीत् 'देवराहा बाबा'

भारते पौराणिकसमयाद् एव ऋषि-मुनीनां परम्परा अस्ति। तत्रैव हिन्दूधर्मे सहस्राधिकानां योगिनां सन्न्यासिनां च वर्णनं लभ्यते। एतेषु एव एकः अस्ति उत्तरप्रदेशस्य देवरियायाः सिद्धः महायोगी बाबा, यं देवराहा बाबा इत्यपि कथयन्ति। बाबा इत्येतस्य विषये कथ्यते यत् सः शताधिकवर्षाणि जीवनस्य कीर्तिमानं साधितवान्, सः अनेकप्रकारकसिद्धीः अपि प्राप्तवान् आसीत। सः जनानां पशूनां च मनसः वार्त्ताः ज्ञातुं निपुणः आसीत। बाबा इत्येतस्य चमत्काराणां विषये अनेकाः कथाः प्रचलिताः सन्ति। इदानीं जानीमः बाबा इत्येतस्य चमत्काराणां कथानां च विषये।

## देवराहा बाबा इत्येतस्य दीर्घायुषः रहस्यम्

- सामान्ये जीवनकाले जनः 70, 80, 90 उत पुनः 100 वर्षपर्यन्तं जीवति। कश्चन एतावद्वर्षाणि यावत् जीवति अपि चेत् एतद् कीर्तिमानस्वरूपं मन्यते किन्तु बाबा देवराहा इत्येतस्य विषये उच्यते यत् सः 900 वर्षाधिकं कालं जीवनस्य कीर्तिमानरूपेण स्थापितवान् आसीत।
- यद्यपि बाबा इत्येतस्य जीवनकालस्य विषये अनेकानि मतानि सन्ति। केषाञ्चिद् कथनम् अस्ति यत् बाबा 250 वर्षाणि यावत् जीवितः, केषाञ्चित् मतम् अस्ति यत् बाबा इत्येतस्य आयुः 500 वर्षाणाम् आसीत। बाबा इत्येतस्य मृत्युः कस्मिन् वर्षे अभवत्, अनेन सहैव बाबा इत्येतस्य जन्मनः विषये अपि अस्पष्टता अस्ति। बाबा इत्येतस्य जन्म कदा, कुत्र कथं च अभवत्, एतस्य विषये अधुना यावत् ज्ञानं न जातम् अस्ति।

## जनसेवां गोसेवां च सर्वोपरि मन्यते स्म 'बाबा देवराहा'

- बाबा देवराहा इत्यसौ भगवतः श्रीरामस्य भक्तः आसीत्, श्रीकृष्णमपि सः श्रीरामस्य तुल्यं मन्यते स्म, भक्तेभ्यः कष्टेभ्यः मुक्तये एतयोः एव मन्त्रं ददाति स्म। किन्तु एतदतिरिक्तं सः गोसेवां जनसेवाम् अपि सर्वतः उपरि मन्यते स्म। सः स्वभक्तानाम्, निर्धनानाम्, असाहाय्यानां च सेवायै, गोमातुः रक्षायै ईश्वरस्य च भक्तौ लीनान् स्थातुं प्रेरयति स्म। बाबा देवराहा इत्यसौ जनान् गोहत्यां विरुद्धान् स्थातुं प्रेरणां दत्तवान् आसीत।

## बाबा इत्येतस्य भक्तेषु प्रसिद्धपुरुषाः अपि सम्मिलिताः

- देवराहा बाबा इत्येतस्य दर्शनाय देश-विदेशतः जनाः आगच्छन्ति स्म किं वा अनेकप्रथितपुरुषाः अपि बाबा इत्येतस्य दर्शनाय आगच्छन्ति स्म। बाबा इत्येतस्य भक्तेषु  जवाहरलालनेहरुः, लालबहादुरशास्त्री, इन्दिरा गान्धिः, राजेन्द्रप्रसादः, महामना मदनमोहनमालवीयः, पुरुषोत्तमदासटण्डनः चेत्यादिसदृशाः प्रथितपुरुषाः सम्मिलिताः सन्ति।

## बाबा देवराहा इत्येतस्य चामत्कारिकाणि अलौकिकानि च रहस्यानि

- सः सरयूनदीतटे निर्मितस्याश्रमस्य काष्ठस्य एकस्मिन् अस्थायिनि क्षेत्रे आसीनः भवति स्म अत्रैव सः स्वभक्तेभ्यः दर्शनं ददाति स्म। उच्यते यत् सरयूनद्याः दियाराक्षेत्रे किं वा तटवर्तिक्षेत्रे स्थितेः एव बाबा इत्येतस्य नाम 'देवराहा बाबा' इति अभवत। बाबा इत्येतस्य शारीरिकनिर्मितिः वेशभूषासंरचना च अद्भुते आस्ताम्। शिथिलकायः, दीर्घजटाः, स्कन्धे यज्ञोपवीतः कट्यां च मृगस्य चर्म तिष्ठति स्म। उच्यते यत् सः पशूनां भाषाम् अपि अवगच्छति स्म, एतेन च चमत्कारेण सः भयानकारण्यकपशून् अपि पलाभ्यन्तरे अधिकरोति स्म। उच्यते यत् बाबा देवराहा इत्यसौ त्रिंशत्कलापर्यन्तं जले विना श्वासमपि स्थातुं शक्नोति स्म।

## देवराहा बाबा इत्येतस्य मन्त्रः

- बाबा भक्तेभ्यः सदा राममन्त्रस्य दीक्षां ददाति स्म, सः कथयति स्म -
- 'एक लकड़ी ह्रदय को मानो दूसर राम नाम पहिचानो
- राम नाम नित उर पे मारो ब्रह्म दिखे संशय न जानो।'
- सः भगवता रामेण सार्धं श्रीकृष्णम् अपि स्वीकरोति स्म। सः श्रीरामं श्रीकृष्णं चैकम् एव स्वीकरोति स्म। तेन भक्तेभ्यः कृष्णमन्त्रः अपि दीयते स्म। सः कथयति स्म -
- 'ऊं कृष्णाय वासुदेवाय हरये परमात्मने
- प्रणतः क्लेशनाशाय गोविन्दाय नमो नमः'

## 'बाबा' एतस्मिन् दिने नश्वरशरीरं त्यक्त वान्

- उच्यते यत् सः जीवने कदापि अन्नं न खादितवान। सः केवलं दुग्धस्य, मधुनः फलानां चाहारं गृह्णाति स्म। बाबा इत्येतस्य जन्मनः दिनाङ्कस्तु अज्ञातः एव अस्ति, यस्मात् कारणात् तस्य आयुषः सम्यग् आकलनं न कर्तुं शक्यते। किन्तु सः अन्तिमं श्वासं 1990तमाब्दे जून मासिके 19दिनाङ्के गृहीतवान् आसीत। एतद् योगिन्येकादश्याः दिनम् आसीत। हिन्दूधर्मे योगिन्येकादशी बहूत्तमा स्वीकृता अस्ति, या मोक्षदायिनी भवति।

### शब्दावली

पौराणिकसमयाद् = पुराणों के समय से,  शताधिकवर्षाणि = सौ से अधिक वर्ष, अनेकप्रकारकसिद्धीः = अनेक प्रकार की सिद्धियों को, असाहाय्यानाम् = सहायता नहीं प्राप्त करने वालों का, भयानकारण्यकपशून् = डरावने जंगली पशुओं को, पलाभ्यन्तरे = पल भर के अन्दर में,
योगिन्येकादश्याः = योगिनी एकादशी का

# मातृबगलामुखीमन्दिरम्ः

## साधुसमाधिना श्मशानेन चावृतम्, गुप्तानुष्ठानस्य अत्र महत्त्वम्




मध्यप्रदेशस्य आगर-मालवाजनपदस्य नलखेड़ोपमण्डले अस्ति मातृबागलामुखीमन्दिरम। एतत् शैवशाक्तसम्प्रदाययोः साधु-तान्त्रिकाणां सिद्धं स्थानम् अस्ति। मन्दिरप्रसिद्धिः तादृशी यत् देशस्य बहवः बृहन्नेतारः निर्वाचने विजयं प्राप्तुम् अत्र यज्ञानुष्ठानं कुर्वन्ति।

लखुन्दरनदीतटे (लक्ष्मणा इति प्राचीनं नाम) स्थिते अस्मिन् देवीमन्दिरे मातृत्रिशक्तिः विराजते, या स्वयम्भूः अर्थात् स्वयम् आविर्भूता मन्यते। मातृबगलामुखीमूर्तिः सम्पूर्णविश्वे केवलेषु त्रिस्थानेषु विराजते, येषु नेपालदेशः, मध्यप्रदेशस्य दतियास्थानम्, मध्यप्रदेशस्य नलखेड़ास्थानं च सन्ति। एतेषु नलखेड़ास्थाने हि मुख्यं मातृसिद्धबगलामुखीमन्दिरं मन्यते ।

### मन्दिरैतिह्यम्

- प्राणतोषिणी, तन्त्रविद्याधारितं पुस्तकम् अस्ति, यस्मिन् बगलामुखीमातुः उत्पत्तिः कथिता अस्ति। कथ्यते यत् सतोयुगे एतादृशः विनाशकारी प्रचण्डवातः आगतः, यस्मिन् समस्तविश्वं नाशयितुं सामर्थ्यम् आसीत। एतद् अवरोद्धुं भगवान् विष्णुः सौराष्ट्रक्षेत्रे हरिद्रासरोवरस्य समीपे तपः कृतवान। तस्य तपसा प्रसन्ना माता बगलामुखी चतुर्दशीतिथौ आविर्भूता ततश्च तया विनाशकारि-प्रचण्डवातात् जगतः रक्षा कृता।
- मन्दिरे स्थापिता माता बगलामुखी त्रिशक्तिमाता कथ्यते, यतोहि सम्भवतः भारते एकम् एवं मन्दिरम् अस्ति, यत्र मातुः स्वयम्भूमूर्तौ तिस्रः देव्यः समाहिताः सन्ति। मध्ये मातृबगलामुखी, दक्षिणे मातृलक्ष्मीः, वामे च मातृसरस्वती सन्ति। मातृबगलामुखी महारुद्रस्य (मृत्युञ्जयशिवस्य) आदिशक्तिरूपेण प्रसिद्धा अस्ति।

### मातृबगलामुखीप्रतिमा

- यत् एतत् सिद्धमन्दिरं श्रीकृष्णकथनेन पाण्डवैः स्थापितम् । ज्येष्ठः पाण्डवः महाराजयुधिष्ठिरः महाभारतयुद्धे विजयं प्राप्तुम् अस्मिन् मन्दिरे बगलामुखीमातुः आराधनां कृतवान्। मन्दिरे बगलामुखीमातरम् अतिरिच्य दक्षिणमुखिहनुमतः, भगवत्कृष्णस्य, कालभैरवस्य च मन्दिरम् अस्ति। मन्दिरस्य पुरतः दिव्यदीपमालिका अस्ति, यस्य स्थापना महाराजविक्रमादित्येन कारिता आसीत। एतदतिरिक्तं मन्दिरस्य सिंहद्वारमपि स्वयमेव अद्वितीयम् अस्ति ।

### तन्त्रसाधनायै महत-स्थानम्

- नलखेड़ा-स्थितं बगलामुखीमातृमन्दिरं सामान्यभक्तान् अतिरिच्य सिद्धसाधुसत्पुरुषेभ्यः तान्त्रिकेभ्यः च साधनायाः सर्वश्रेष्ठं स्थानं मन्यते। परितः श्मशानेन आवृतत्वात्, नदीतटे च स्थितत्वात् एतत् स्थलं तान्त्रिकविद्यासाधनायै उपयुक्तं मन्यते। नवरात्रकाले अस्य मन्दिरस्य महत्त्वम् अतोऽपि अधिकं वर्धते।
- मन्दिरस्य पार्श्वे नदीतटे च साधुसत्पुरुषाणाम् अनेकानि समाधिस्थलानि सन्ति, यानि एतस्य प्रमाणभूतानि सन्ति यत् अत्र साधुसत्पुरुषाः जीवनस्य अन्तिमकालं यावद् अत्र न्यवसन। अस्य मन्दिरस्य मरीचयागः सम्पूर्णे भारते प्रसिद्धः अस्ति, यः सर्वविध-क्लेशवारणाय, शत्रुविनाशाय च क्रियते। मन्दिरस्य पृष्ठे यज्ञस्थलम् अस्ति, यत्र युगपत् 25-30 यज्ञाः भवन्ति। अस्याः यज्ञक्रियायाः प्रत्यक्षतः दर्शनं स्वस्मिन्नेव दैवीयः अनुभवः अस्ति।

### गुप्तानुष्ठानाय आगच्छन्ति नेतारः

- निर्वाचने विजयं प्राप्तुं स्वशत्रून् च जेतुं देशस्य सर्वस्मात् स्थानात् नेतारः अस्मिन् मन्दिरे गुप्तानुष्ठानार्थम् आगच्छन्ति। भारतीयराजनीतेः अनेके महान्तः नेतारः अस्मिन् मन्दिरे बगलामुखीमातुः आशीर्वादं प्राप्य निर्वाचने विजयं प्राप्तवन्तः। यदा अपि देशे लोकसभानिर्वाचनानाम्, विभिन्नराज्येषु च विधानसभानिर्वाचनानां कालः आरभते, तदा बगलामुखीमातृमन्दिरे महतां नेतर्णिां गमनागमनम् अपि प्रारभते।

### कथम्प्राप्नुम?

- श्रद्धालवः बगलामुखीमातुः एतद्दिव्यमन्दिरस्य यात्रां कदापि कर्तुं शक्नुवन्ति। मध्यप्रदेशस्य आर्थिकराजधानी-रूपेण प्रसिद्धात् इन्दौर-नगरात् नलखेड़ा-स्थानं प्रायः 158 कि.मी.मितं दूरम् अस्ति। इन्दौर-नगरमार्गेण नलखेडास्थानं सम्बद्धम् अस्ति । एतदतिरिक्तं नलखेड़ा-स्थानं गन्तुं समीपस्थं रेलस्थानकम् उज्जैन-नगरम् अस्ति, यत् मन्दिरात् प्रायः 100 कि.मी.मिते दूरे अस्ति । आगर-मालवाजनपदः इन्दौर-उज्जैन-नगरम् अतिरिच्य भोपाल-कोटाद्यन्यनगरैः सहापि राजमार्गेण सम्बद्धम् अस्ति ।



### शब्दावली

शैवशाक्तसम्प्रदाययोः = शैव और शाक्त सम्प्रदायों में,
तन्त्रविद्याधारितम् = तन्त्र विद्या पर आधारित,
दक्षिणमुखिहनुमतः = दक्षिणमुखी हनुमान् का,
तान्त्रिकविद्यासाधनायै = तान्त्रिक विद्या साधना के लिए,

# अयोध्या



वयम् अद्य अयोध्यायाः चर्चां कुर्मः। अयम् आलेखः अतः, येन आगामिनी सन्ततिः अयोध्यामाहात्म्यम् अवगम्य एतन्निधेः संरक्षणं कुर्यात् । अयोध्या भारतस्य उत्तरप्रदेशराज्यस्य प्रमुखं नगरम् अस्ति । कतिपयवर्षेभ्यः एतन्नगरं भारतस्य चर्चितनगरेषु अपि अन्यतमम् अस्ति । यस्य कारणम् अस्ति, अत्रत्यः राममन्दिर-बाबरीमस्जिद-विवादः। अयं च विवादः अयोध्यायाः इतिहासं कलङ्कयति। अयोध्यायाः उत्तरप्रदेशस्य भारतस्य ऐतिह्यम् आकर्षकम् अस्ति। प्राचीनैतिह्यानुसारम्, अयोध्या पवित्रतमनगरेषु अन्यतमम् आसीत्, यत्र हिन्दूबौद्धेस्लामजैनधर्माणां धार्मिकनेतारः एकत्रिताः सन्तः पवित्रस्थानस्य निर्माणं कर्तुम् आरभन्त। अयोध्या-नगरस्य ऐतिह्यं विविधपरिवर्तनानां साक्षित्वं भजते । अथर्ववेदे, एतत् स्थानम् एवंविधनगररूपेण वर्णितं यद् देवताभिः संस्थापितं स्वर्गरूपेण च समृद्धम् आसीत् ।

प्राचीनकोसलराज्यस्य शक्तिसम्पन्नसाम्राज्ये अयोध्या राजधानी आसीत् । खीष्टपूर्वात् षष्ठशताब्द्याम् एतन्नगरं महत्त्वपूर्णं व्यापारकेन्द्रम् अपि आसीत् । इतिहासकाराः अस्य स्थलस्य परिज्ञानं खीष्टपूर्वस्य पञ्चशताब्द्याम् एकं प्रमुखबौद्धकेन्द्रं साकेतः, (इयं व्यापकधारणा अस्ति यत् बुद्धः अनेकावसरेषु अयोध्यायात्रां कृतवान् ) यत् खीष्टपूर्वपञ्चशताब्दीं यावत् स्थितः। वस्तुतः चीनदेशीयः भिक्षुः फा-हियान् इत्यसौ अत्र दृष्टवान् यत् अनेकबौद्धमठानाम् अभिलेखाः संरक्षिताः सन्ति। जैनसमुदायस्य कृते अयोध्यायाः ऐतिहासिकं महत्त्वम् अस्ति। इयं द्वयोः महत्त्वपूर्णयोः जैनतीर्थङ्करयोः जन्मस्थली अस्ति, यौ शताब्दस्य आरम्भे जन्म लेभाते। जैनग्रन्थाः अपि वदन्ति जैनधर्मसंस्थापकस्य महावीरस्य एतन्नगरभ्रमणसाक्ष्यम। सप्तमशताब्द्यां चीनदेशस्य भिक्षुः जुआन् झाङ्ग (ह्यूएन् त्सङ्ग) इत्यसौ अयोध्यायाम् अनेकहिन्दूमन्दिराणि अन्विष्य उद्धृतवान।

रामायणमहाकाव्ये अयोध्यानगरी भगवतः रामस्य जन्मस्थानरूपेण उद्धृता, सः रामः सनातनदेवः, यः भगवतो विष्णोः सप्तमावतारत्वेन पूजितः। 1400तमेऽब्दे तदा अयोध्या प्रसिद्धतीर्थस्थलत्वेन सिद्धा, यदा हिन्दूरहस्यवादी रामानन्दः रामस्य भक्तिसम्प्रदायस्य स्थापनां कृतवान। 16शताब्द्याम् अयोध्यायां मुगलसाम्राज्यशासने आगते सति अत्रत्ये शासने अपि परिवर्तनं जातम्। 1856तमाब्दे आङ्गलप्रशासकैः अयोध्यायाः अधिग्रहणं कृतम्। 1857-1859तमवर्षयोः मध्ये, एतत् स्थानं तेषु मुख्यकेन्द्रेषु एकतमम् आसीत्, यत्र भारतीयस्वतन्त्रतायाः प्रथमयुद्धस्य दिव्यता प्रखरा आसीत्,। पश्चात् एभिः कलकत्तानगरे आरब्धां ब्रिटिश-ईस्ट् इण्डिया-कम्पनी इत्येतत्समवायं विरुद्ध्य भारतीयसैनिकानां राष्ट्रव्यापिविद्रोहस्य नेतृत्वं कृतम्।

## अयोध्यायां दर्शनीयस्थलानि

### अयोध्याघट्टकानि

अयोध्यायां सरयूनद्याः तटे बहुसुन्दराणि पक्वानि घट्टकानि निर्मितानि सन्ति । यदि पश्चिमतः पूर्वं चलेम तर्हि इमानि घट्टकानि निम्नक्रमेण लप्स्यन्ते।

1. ऋणमोचनघट्टकम्
2. सहस्त्रधरघट्टकम्
3. लक्ष्मणघट्टकम्
4. स्वर्गद्वारघट्टकम्
5. गङ्गामहलघट्टकम्
6. शिवालाघट्टकम्
7. जटाईघट्टकम्
8. अहिल्याबाईघट्टकम्
9. धौरहराघट्टकम्
10. रूपकलाघट्टकम्
11. नयाघट्टकम्
12. जानकीघट्टकम्
13. रामघट्टकम्

## अयोध्यायाः ऐतिह्यस्य अन्यः एकः पक्षः

धार्मिकदृष्ट्या अयोध्यायाः प्राचीनैतिह्यं कथयति यत् वर्तमानाऽयोध्या महाराजविक्रमादित्येन स्थापिता। महाराजविक्रमादित्यः देशाटनं कुर्वन् अत्र सरयूनदीतटं प्राप्तः। अत्रैव तस्य सेनया शिविर-निर्माणं कृतम्। तस्मिन् समये अत्र वनम् आसीत्, अत्र किमपि प्राचीनं तीर्थचिह्नं नासीत। महाराजविक्रमादित्यः अस्यां भूमौ किमपि अद्भुतं लक्षितवान्। सः अन्वेषणम् आरब्धवान्, समीपस्थसाधुयोगिजनानाम् अनुग्रहेण ज्ञातवान् यत् एषा अवधभूमिः अस्ति। तेषां साधूनां निर्देशेन असौ भगवल्लीलास्थलीं ज्ञात्वा अत्र मन्दिरसरोवरकूपादीनि निर्मापितवान्।

मथुरावद् अयोध्या अपि आक्रमणकारिभिः मुहुर्मुहुः आक्रान्ता। पुनः पुनः आततायिभिः पावननगरी इयं भ्रंशिता। प्राचीनतानाम्नि अधुना तु अयोध्यायां केवलं भूमिः सरयूनदी चैव अवशिष्टे स्तः।

एतद् अपि कथ्यते यत् मर्यादापुरुषोत्तमश्रीरामेण सह अयोध्यायाः कीट-पतङ्गाः अपि तद्दिव्यं धाम गतवन्तः। एतस्मात् कारणात् त्रेतायुगे एव अयोध्या ध्वस्ता। मान्यता अस्ति यत् श्रीरामपुत्रः कुशः इमां पुनः संस्थापितवान।

धार्मिकदृष्ट्या अयोध्यादर्शनम् - अयोध्यातीर्थयात्रा

भारतस्य प्राचीनसांस्कृतिकसप्तपुरीषु अयोध्यायाः प्रथमस्थानं वर्तते। एषा भगवतः श्रीरामस्य पूर्ववर्तीनां राज्ञां राजधानी आसीत्। इक्ष्वाकुतः आश्रीरघुनाथं सर्वैः चक्रवर्तिभिः नरेशैः अयोध्यासिंहासनम् अलङ्कृतम। श्रीरामस्य अवतारभूमिः सती अयोध्या पश्चात् साकेतनाम्ना प्रसिद्धा।

## अयोध्यामाहात्म्यम्

वाल्मीकिरामायणानुसारम् इयं पवित्रनगरी सरयूनदीतटे स्थिता अस्ति। सर्वप्रथमं मनुना इयं स्थापिता आसीत। स्कन्दपुराणानुसारम् अयोध्यानगरी सुदर्शनचक्रस्य उपरि स्थिता अस्ति । भूतशुद्धितत्त्वानुसारम अयोध्यानगरी श्रीरामचन्द्रस्य धनुषः अग्रे स्थिता अस्ति। स्कन्दपुराणे अयोध्यार्थनिर्वचनं कुर्वन् उच्यते यत् अ-कारः ब्रह्मा। य-कारः विष्णुः। ध-कारः च रुद्रस्वरूपः। अत एव अयोध्या ब्रह्मविष्णुशङ्कराणां त्रयाणां समन्वितं रूपम। समस्तैः उपपातकैः सह ब्रह्महत्यारूपमहापातकादिकमपि अनया सह न योद्धुं शक्नुवन्ति, तस्माद् 'अयोध्या' उच्यते।

प्राग् ब्रह्मा अयोध्यायात्राम् अकरोत्, अथापि सः तत्र स्वनाम्नः कुण्डं निर्मितवान् आसीत। यद् ब्रह्मकुण्डनाम्ना प्रसिद्धम्। सीतानिर्मितम् एकं कुण्डं सीताकुण्डनाम्ना प्रथितम। एतत् कुण्डं भगवता रामेण वरं प्रदाय सर्वकामपूरकं निर्मितम्, एतस्मिन् स्नानेन मनुष्याः सर्वपापमुक्ताः भवन्ति।

ब्रह्मकुण्डस्य पूर्वोत्तरस्याम् ऋणमोचनतीर्थम् (सरयूः) अस्ति। अत्र लोमेशः विधिपूर्वकं स्नातः आसीत् । सरयूनद्याम् एव रुक्मिणीतीर्थम्, यत्र भगवतः श्रीकृष्णस्य उपराज्ञी रुक्मिणी स्नाता आसीत। उच्यते यत् यः अयोध्यायां स्नान-जप-तपो-यज्ञ-दान-दर्शन-ध्यानादीनि करोति, सः अक्षयः भवति।



### शब्दावली

पवित्रतमनगरेषु = सबसे पवित्र नगरों में, एतन्नगरभ्रमणसाक्ष्यम् = इस नगर के भ्रमण का साक्ष्य, राष्ट्रव्यापिविद्रोहस्य = राष्ट्रव्यापी विद्रोह का, भगवल्लीलास्थलीम् = भगवान् की लीलास्थली को, प्राचीनसांस्कृतिकसप्तपुरीषु =प्राचीन सांस्कृतिक सात पुरियों में, स्कन्दपुराणानुसारम् = स्कन्द पुराण के अनुसार, ब्रह्महत्यारूपमहापातकादिकम् = ब्रह्महत्या रूप महापातक आदियों को,



# अस्माकं वैदिकसंस्कृतिं बुध्यताम

वेदशब्दस्य अर्थः पवित्रता, आध्यात्मिकज्ञानस्य परिज्ञानम् इति। अथ एते वेदाः उच्चतमं आध्यात्मिकं ज्ञानं प्रदातुं शक्नुवन्ति इत्यस्माद् अमोघाः मन्यन्ते स्म। प्रारम्भे वेदाः मौखिकरूपेण प्रसारिताः आसन् । यतोहि प्रारम्भिकार्याणाम् अस्माकं ज्ञानम् एतेषु वेदेषु आधारितम् आसीत्, अत एव एतत्कालिकी संस्कृतिः वैदिकसंस्कृतिः कथ्यते। विद्वांसः वैदिककालं पूर्वोत्तरवैदिककालयोः विभजन्ति। पूर्वप्रतिनिधित्वम् ऋग्वेदेन क्रियते, उत्तरप्रतिनिधित्वं च ब्राह्मणारण्यकोपनिषत्- सहितान्यवैदिकसाहित्य- द्वारा दर्श्यते। यद्यपि रामायणं महाभारतं चेति महाकाव्यद्वयं पुराणं च बहुपश्चात् सङ्कलितानि, पुनरपि पूर्वकालस्य जीवनं समाजं चापि प्रकाशयन्ति। एतदवधये उत्तरप्रदेशस्य केषुचित् क्षेत्रेषु पुरातत्त्वसाक्ष्याणि अपि प्राप्तानि सन्ति। ऋग्वेदे नगरनाशकेन्द्रस्तुतौ प्रायः 250 सूक्तानि, भगवदग्निस्तुतौ च 200 सूक्तानि सन्ति।

## समाजः धर्मः च

यद्यपि आर्याणां समाजः पितृसत्तात्मकः आसीत् तथापि महिलाभिः सार्धं समानतायाः सम्मानस्य च व्यवहारः क्रियते स्म । परिवारः समाजस्य लघुतमः सामाजिकः ऐककः आसीत्; अनेकपरिवारैः ग्रामः, अनेकग्रामैश्च विश इति निर्मीयते स्म। अनेकग्रामैः जनजातिः जनो वा सङ्घट्यते स्म, यत्र राज्ञः प्रमुखशासनम् आसीत् । तेषां मुख्यं कार्यं बाह्याक्रमणात् जनजातिरक्षणम्, विधिव्यवस्थाविधानं च आसीत् । तस्मै सभा-समिति-नामकयोः परिषदोः सदस्यैः सहायता प्रदत्ता आसीत् । पुरोहिताः धार्मिककार्यं कुर्वन्ति स्म, सेनाः सैन्यगतिविधीनां निरीक्षणं कुर्वन्ति स्म । अस्मिन् स्तरे राज्यस्य का अपि अवधारणा नासीत् । यद्यपि राज्ञः पदं वंशानुगतं जातम् आसीत् तथापि तस्य दुर्बले अक्षमे उत क्रूरे प्राप्ते सति सः शासनतः बहिष्कर्तुं शक्यते स्म। उत्तरवैदिककाले समाजः चतुर्वर्णेषु विभक्तः आसीत् - ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः च। इयं वर्णव्यवस्था अपि कथ्यते स्म । प्रारम्भे अस्य अर्थः आसीत् विभिन्नप्रकारकं कार्यं कुर्वतां जनानां श्रेण्यः, परन्तु कालक्रमान्तरेण सह एतद् विभाजनम् आनुवंशिकः कठोरः च अभवत् । शिक्षकाः ब्राह्मणाः, शासकाः क्षत्रियाः, कृषकव्यापारिकोषाध्यक्षाः वैश्याः कथ्यन्ते स्म, श्रमिकाः शिल्पिनः च शूद्राः उच्यन्ते स्म। उत्तरवैदिककाले एकस्माद् व्यवसायाद् अपरस्मिन् व्यवसाये गमनं कठिनम् अभवत्, अनेन सहैव ब्राह्मणाः अपि समाजे एकं प्रमुखं स्थानम् अधिकृतवन्तः।

तात्कालिकी एका अन्या महत्त्वपूर्णा सामाजिकसंस्था आसीत् चतुराश्रमव्यवस्था उत चतुर्विभिन्नचरणेषु जीवनकालविभाजनम् अर्थात् ब्रह्मचर्यः (गुरोः आश्रमे ब्रह्मचर्यस्य, शिक्षायाः, अनुशासितजीवनस्य च अवधिः), गृहस्थः (पारिवारिकजीवनस्य अवधिः), वानप्रस्थः (क्रमिकपृथग्भावस्य अवधिः), सन्न्यासः च (लौकिकजीवनात् दूरम् आध्यात्मिककार्येषु समर्पितजीवनस्य चरणम)। अत्र अवधेयं यत् एतानि विभाजनानि स्त्रीभ्यः निम्नवर्णिकजनेभ्यः वा न आसन्। समाजेन महिलाः सम्मानिताः जायन्ते स्म, स्वातन्त्र्यस्य च आनन्दं गृह्णन्ति स्म, शिक्षां यावत् अधिकारः आसीत्, प्रायः स्वयंवरमाध्यमेन स्वजीवनसहयोगिनः चयनं कर्तुं च स्वातन्त्र्यम् आसीत् । अवगुण्ठन-सतीप्रथे प्रचलिते नास्ताम। जीवनस्य चरमलक्ष्यं धर्मार्थकामानाम् अनुसन्धानेन मोक्षप्रापणम् आसीत।

प्रारम्भिकवैदिकजनाः प्रकृतिशक्तीः पूजयन्ति स्म, ताः देवदेवीरूपेण परिचिन्वन्ति स्म। इन्द्राग्निवरुणमरुतः तेषां केषुचिद्देवेषु आसन् अथ उषादितिपृथिव्यः तेषां कासुचिद्देवीषु आसन् । ऋग्वेदे उल्लिखितासु कासुचित् सौरदेवतासु सूर्यसावित्रीपूषाणः सन्ति । यज्ञः वैदिकभजनजपेन सह क्रियते स्म। जनाः देवाशीर्भ्यः अग्नौ घृतादिकम् अन्यच्छाकल्यं प्रयच्छन्ति स्म । अग्निः देवतानां मनुष्याणां च मध्यस्थत्वेन दृश्यते स्म। वैदिकजनाः व्यक्तिगतरूपेण सामूहिकरूपेण च जनानां कल्याणाय प्रार्थनां कुर्वन्ति स्म। उत्तरवैदिककाले धार्मिकप्रथासु परिवर्तनं जातम् । प्रारम्भिकवैदिककालस्य प्रमुखदेवतानां यथा इन्द्राग्निवरुणानां प्रमुखता नष्टा, तत्स्थाने देवतानां नूतना त्रिमूर्तिः आगता, यत्र ब्रह्मपदं सर्वोच्चपदेन नन्दति स्म, विष्णुः संरक्षकः, शिवश्च त्रिमूर्तिं पूरितवान् । धर्मः अतिकर्मकाण्डपरः अभवत् । संस्कृतमन्त्राः, ये ब्राह्मणाधिकृताः आसन्, समस्तधार्मिककार्याणाम् अनिवार्याङ्गानि अभवन् । अनेन ब्राह्मणाः बहुशक्तिमन्तः, यज्ञाः च महार्हाः अभवन्। तेषु सहभागिता उच्चत्रिवर्गेषु एव सीमिता आसीत। राजानः स्वस्थितिसन्धारणार्थम् अश्वमेधराजसूयवाजपेययज्ञान् कृतवन्तः। एतद् परिज्ञानम् अतिरोचकम् आसीत् यत् वैदिकयुगस्य संस्कृतेः कानिचत् तत्त्वानि 3,000 वर्षाधिकानि जीवितानि, अद्य अपि भारतीयसंस्कृतेः अङ्गानि एव सन्ति।

उत्तरवैदिकयुगान्तं यावत् समाजे परिवर्तनं प्रारब्धम। प्रथमवारं जनाः ब्रह्माण्डनिर्माणे, मृत्योः अनन्तरं जीवने, जीवनसारे इत्येतादृशीसु कतिपयमान्यतासु चर्चाम् आरब्धवन्तः। एते प्रश्नाः एवंविधाः आसन्, येषां विषये उपनिषत्सु विस्तरेण चर्चा कृता अस्ति। आर्याः मुख्यतः ग्रामवासिनः कृषकाः च आसन् । ते गोघोटकमेषाजकुक्कुरादिसदृशपशून् पालयन्ति स्म । ते अन्नम्, सूपम्, फलम्, शाकम्, दुग्धम्, विविधदुग्धोत्पादयुक्तं च सरलाहारं स्वीकुर्वन्ति स्म । ते सोमपेयम् अपिबन् । चतुरङ्गक्रीडा-रथधावनादिकं तेषां मनोरञ्जनसाधनम् आसीत् । प्रारम्भिककाले धनव्यवहारः करव्यवस्था वा नासीत् । बलिः उत स्वैच्छिकदानं प्रचलति स्म । गौः धनमापः आसीत् । यथा यथा कालः अग्रे गतः तथा तथा लोहस्य व्यापकप्रयोगेण तेषां भौतिकजीवने बृहत्-परिवर्तनानि अभवन् । लोहकुठारैः ते अरण्यानि कर्तयितुं शक्ताः अभवन्, येन सम्पूर्णगङ्गाक्षेत्रे कृषिविस्तारः अभवत् । लोहसाधनानां कारणात् विविधशिल्पप्रौद्योगिकी प्रसृता। लोहशस्त्राणाम्, अश्वानां प्रयोगेण ते युद्धकरणे, शत्रुं विरुद्ध्य च भद्रतररक्षणे सक्षमाः अभवन्। शिल्पस्य वर्धमानसङ्ख्या, अधिशेषभोजनस्य उपलब्धता, जनसङ्ख्यायाः च वृद्धिः कौशलस्य, नगरीकरणस्य च विशेषज्ञताम् उत्पादितवान्। नगराणां ग्रामाणां च विकासः, क्षेत्रीयराज्यानां च उदयः अभवत। मुद्राः प्रचलने आगताः । जलस्थलमार्गाभ्यां व्यापारः भौतिकसमृद्धिवर्धनार्थं कृतः आसीत् ।

### शब्दावली

एतत्कालिकी = इस काल की, पूर्वोत्तरवैदिककालयोः = पूर्व (पहले) और उत्तर (बाद) के वैदिक कालों का, बाह्याक्रमणात् = बाहरी आक्रमणा से, अवगुण्ठन-सतीप्रथे = पर्दा और सती प्रथाएं, गोघोटकमेषाजकुक्कुरादिसदृशपशून् = गाय, घोड़ा, भेड़, बकरा, कुत्ता आदि जैसे पशुओं को, भौतिकसमृद्धिवर्धनार्थम् = भौतक समृद्धि को बढ़ाने के लिए




# सनातनम् एकीकर्तुं 'भिक्षायात्रां' करोति स्वामी दीपांकर महाराजः

स्वामी दीपाङ्करः महाराजः जातिषु विभक्तसनातनधर्मस्य जनानाम् एकत्रीकरणस्य लक्ष्यं कृतवान् अस्ति। एतद् एव गृहीत्वा सः 2022तमाब्दस्य नवम्बरमासस्य 23दिनाङ्कात् एकस्य वर्षस्य भिक्षायात्रार्थं प्रचलति। भिक्षारूपे चूर्णम्, द्विदलम् उत तण्डुलादिकं न याच्यते अपि तु जातिषु विभक्तसनातनधर्मम् एकत्रीकर्तुं प्रयतते। पृथक्-पृथक् स्थानेषु गत्वा जनेभ्यः भिक्षारूपेण सनातनधर्मस्य ऐक्यस्य सङ्कल्पं कर्तुं सः याचते। इयं यात्रा पश्चिमवर्त्युत्तरप्रदेशस्य देवबन्दस्थानात् आरब्धा आसीत्। तस्य भिक्षायात्राया उद्देश्यं केवलम् एतावदेव यत् देशाय जातिगतजनगणनायाः काऽपि आवश्यकता नास्ति अपि तु जातिषु विभक्तसमाजस्य एकीकरणस्य आवश्यकता अस्ति।

स्वामी दीपाङ्करः महाराजः कथितवान् यत् यदि चर्चा राष्ट्रवादस्य, अध्यात्मवादस्य सांस्कृतिकवादस्य च क्रियते तर्हि भिक्षायात्रायाः चर्चा अवश्यं भवति। सः उक्तवान् यत् इयं भिक्षायात्रा देवबन्दस्य महाकालेश्वराश्रमात् प्रारब्धा, या निरन्तरं प्रचलन्ती धामपुरात् शामली-दिल्ली-गाजियाबाद-बागपत-बड़ौत-मुजफ्फरनगरमार्गतः सहारनपुरे अभवत्, या निरन्तरं वर्धते। सः उक्तवान् यत् नवम्बरमासस्य 23दिनाङ्कात् प्रारब्धायाः अस्याः यात्रायाः एकवर्षपूर्तौ समापनं भविष्यति।

## जातिषु विभक्त : हिन्दूजनः खण्डितः न स्यात

स्वामी दीपाङ्करः महाराजः उक्तवान् यत् भिक्षायात्रायाम् अस्मभ्यम् भिक्षुकत्वेन समाजस्य जनाः भिक्षायां जातिषु विभक्तसमाजं खण्डितं न भवितुं दास्यन्ति इत्येतद् वचनं दद्युः। एतस्याः यात्रायाः मुख्यबिन्दुः, मम च इच्छा इयमेव अस्ति यत् सनातनधर्मः जातिषु न विभज्येत यतोहि यदि हिन्दूधर्मः समाजश्च यावान् खण्डितः भविष्यति, तावत् एव बहवः जनाः उच्चस्वरेण जातिगतजनगणनायाः स्वरं करिष्यन्ति। सः कथितवान् यत् वर्तमाने देशे, विशेषतः च उत्तरप्रदेशे जातिगतजनगणनायाः आवश्यकता सर्वथा नास्ति। आवश्यकता अस्ति चेत् केवलं जातिषु विभाजितसनातनसंयोजनस्य। सः उक्तवान् यत् एतस्याः भिक्षायात्रायाः उद्देश्यम् अधुना समाजः सुनिश्चिनुयात् यत् रामचरितमानसग्रन्थस्य प्रज्वालकाः महान्तः, उत धार्मिकग्रन्थं प्रतिगृहं प्रापयितारः महान्तः सन्ति। समाजं जातिषु विभज्य, प्रगणय्य च विध्वंसकाः दीर्घाः सन्ति उत करेण करं सम्मिल्य एतत्संयोजकाः दीर्घाः सन्ति।

## कोऽयं स्वामी दीपाङ्करः



* स्वामी दीपाङ्करः अन्ताराष्ट्रियः ध्यानगुरुः अस्ति
* मूलरूपेण उत्तरप्रदेशस्य मुजफ्फरनगरस्य वास्तव्यः अस्ति।
* 8 वर्षस्य आयुषि सः अध्यात्ममार्गे अग्रे भूतः
* गुरुब्रह्मानन्दसरस्वती इमं स्वशिष्यत्वेन स्वीकृतवान्
* कोलकातायाः कालीघाटमन्दिरे कामाख्यामन्दिरे च सूर्यसाधनां पूरितवा
* स्वामी दीपाङ्करः ध्यान फाउण्डेशन इत्येतस्य संस्थापकः अस्ति
* पश्चिमवर्त्युत्तरप्रदेशस्य देवबन्दस्थाने आश्रमः अपि अस्ति।

### शब्दावली

विभक्तसनातनधर्मस्य = बँटे हुए सनातन धर्म का, पश्चिमवर्त्युत्तरप्रदेशस्य = पश्चिमी उत्तर प्रदेश का, महाकालेश्वराश्रमात् = महाकालेश्वर आश्रम से, प्रारब्धा = प्रारम्भ हुई, विभक्तसमाजम् = बँटे हुए समाज को



# रामराज्यसारः सुराज-सुशासनम्

## एतत्प्रेरितं महात्मगान्धिस्वप्नस्य रामराज्यमप्यासीत



### सामूहिकजीवनकल्पनापूर्णम् अस्ति रामराज्यम

- स्वाधीनतान्दोलने यस्य आदर्शस्य सर्वाधिकः शब्दप्रयोगः अभवत्, सः अस्ति रामराज्यम। वस्तुतः रामराज्यस्य अवधारणा न केवलं स्वातन्त्र्यस्य राजनीतिपरमर्थं प्रस्तुतं करोति, अपि तु मानवसभ्यतायाम् एतादृशस्य विशेषराष्ट्रस्य कल्पना अस्ति, यस्मिन् सर्वे नागरिकाः विधिसम्मतमर्यादायां जीवनं यापयन्तः धर्मम् अनुसरन्ति।
- रामराज्यविधिसम्मतायाः उत धर्मसम्मतायाः मर्यादायाः अवधारणा न केवलं राज्ञः शासकस्य वा कर्तव्यस्य विचारः, अपि तु एतादृशस्य सम्पूर्णस्य राज्यव्यवस्थायाः निर्माणम् अस्ति यस्मिन् सामाजिकजीवनस्य प्रत्येकं कोणं धर्मस्य चतुश्चरणेषु सत्यचिन्तनदयादानेषु अवलम्बते। इयम् एतादृशी चतुष्पदव्यवस्था अस्ति, या राज्यस्य समाजस्य च सर्वान् मूलभूतघटकान् यथार्थश्रद्धया ओतं प्रोतं च कृत्वा सर्वेषां स्वतन्त्रतां सुनिश्चितां करोति। एतद् एवंविधम् ईश्वरकृतराज्यम्, यद् अकालमृत्युविहीनं सर्वविधपीडामुक्तं स्यात् । सर्वे भद्रं कल्याणं सर्वत्र द्रक्ष्यन्ति। न कश्चित् दीनः, दुःखी, दरिद्रः वा भविष्यति। सर्वे शिक्षिताः प्रबुद्धाः सर्वमङ्गलसमन्विताः च भविष्यन्ति।

### सामूहिकजीवनशैल्याः विचारधारा

- श्रीरामराज्ये कोऽपि दुःखी नासीत। प्रत्येकं जनः स्वश्रमस्य कर्मणः च सम्यक् परिणामं प्राप्नोति स्म। सर्वैः सह न्यायः भवति स्म। न्यायधर्मतुलायां राजरङ्क्योः, शीर्षनिम्नतलयोः चाधारेण विशेषाधिकारभेदः नासीत् । गोस्वामी तुलसीदासः रामराज्ये एतादृशं जीवनं कल्पितवान्, एतादृशं सामूहिकं जीवनम् अकल्पयत्, यस्मिन् प्रत्येकं व्यक्तिः, नराः नार्यः वा दम्भाहङ्कारमुक्ताः सन्ति। सर्वे परिजनेभ्यः आदरं ददति। सर्वेषु कृतज्ञताभावः अस्ति। छलकपट-विहीनं जीवनं यापयतां समाजः अस्ति ।
- वस्तुतः रामराज्यस्य अवधारणा एव एतादृशसुशासनस्य कल्पना अस्ति, यस्यां सर्वे योग्याः भवितुं योग्यतानुसारं सर्वं प्राप्तुं च अधिकारं स्थापयन्ति । अत्र सर्वत्र पारदर्शिता वर्तते परन्तु समाजस्य अन्तिमपुरुषस्य उत्थानस्य चिन्ता महत्त्वपूर्णा अस्ति। अधुना रामराज्यस्य अस्मिन् कल्पने केचन विषयाः महत्त्वपूर्णतया उद्भवन्ति। रामराज्ये शासनं कथं भविष्यति? तस्य चारित्रिकविशिष्टताः काः भविष्यन्ति ? सर्वे न्यायं प्राप्तुं शक्नुयुरिति का प्रणाली भविष्यति? समाजे सर्वेभ्यः समानतानिर्मितिः कथं भविष्यति ? सामाजिकजीवनस्य अन्तिमस्थाने स्थितस्य जनस्य स्वरः, तस्य इच्छा आकाङ्क्षा वा कथम् अभिव्यक्ता भविष्यति, आसर्वोच्चं च श्रवणं सम्पत्स्यते।

### महात्मनः स्वप्नः

- महात्मगान्धिः अस्य रामराज्यस्य स्वप्नं विशदय्य कथयति - रामायणस्य प्राचीनम् आदर्शरामराज्यं निस्सन्देहं यथार्थलोकतन्त्रेषु अन्यतमम् इति। मम स्वप्नानां रामराज्यं राज्ञः निर्धनस्य च समानाधिकारान् सुनिश्चिनोति। मया यत् रामराज्यं वर्ण्यते तत् नैतिकाधिकाराधृतं जनसम्प्रभुत्वम् अस्ति। वस्तुतः रामराज्यस्य एषः स्वप्नः विज्ञातेतिहासे नास्ति । प्रत्येककालखण्डे सर्वस्य राज्ञः सर्वस्याः प्रजायाः च स्वप्नः एषः । एतस्य स्वप्नस्य चारितार्थ्यं सम्पादयत् यत् महत्कालखण्डम् भारतीयेतिहासे सदा सर्वदा स्पृहणीयविषयत्वेन स्थितम्, तदस्ति मर्यादापुरुषोत्तमश्रीरामराज्यम्। अमृतबाजारपत्रिकायां 2 अगस्त 1934तमाब्दस्य अगस्तमासिके द्वितीये दिनाङ्के प्रकाशिते लेखे गान्धिः उक्तवान् आसीत् यत् मम स्वप्नागतं रामायणं राज्ञः निर्धनस्य च कृते समानाधिकारान् सुनिश्चितान् करोति।
- ततः 1937तमवर्षस्य जनवरीमासस्य 2 दिनाङ्के 'हरिजन'-पत्रे सः अलिखत् यत् 'मया यत् रामराज्यं वर्णितं तत् नैतिकाधिकाराधृतं जनसम्प्रभुत्वसंयुतम् अस्ति।' रामराज्यलक्ष्यं प्राप्तुं महात्मा न्यासस्य सिद्धान्तं प्रतिपादितवान् यः सामाजिकलक्ष्यप्राप्तये धनपुञ्जवादस्य दानहेतुप्रयोगे आधारितः आसीत् । महात्मगान्धिः उक्तवान्, मम न्यासस्य सिद्धान्तः अस्थायी नास्ति । अस्मिन् छल-कपटता नास्ति। एतस्मै दर्शनशास्त्रस्य धर्मस्य च अनुमोदनम् अस्ति।

### लोकहितमानवतयोः आधारः

- गोस्वामी तुलसीदासः रामराज्यस्य कल्पनां कुर्वन् राज्ञः कृते कांश्चन् गुणान् उक्तवान। यथा- लोकवेदविहितनीतेः अनुसरणम्, धार्मिकत्वम्, प्रजापालकत्वम्, सौम्यत्वम्, उदारत्वम्, दृढस्वभावत्वम्, दानशीलत्वम् इत्यादयः। श्रीरामे आदर्शस्य राज्ञः सर्वे गुणाः सन्ति। तस्मै स्वप्रजा जीवनादप्यधिकप्रिया अस्ति। प्रियजनान्, पुरजनान्, गुरुजनान्, सर्वान् च प्रति रामव्यवहारः आदर्शस्य धर्मस्य चानुकूलः अस्ति। एतादृशे रामराज्ये विषमता स्थातुं न शक्नोति, सर्वविधदुःखेभ्यश्च प्रजायै त्राणं लभते। महात्मगान्धिना परिकल्पितं यद् रामराज्यम्, तस्य मूलाधारोऽपि तुलसीदासस्य रामराज्यपरिकल्पना एव अस्ति। नूनम् एव इयम् आदर्शशासनव्यवस्था अस्ति, यस्याः मूलभूतः आधारः लोकहितं मानववादः च।

### सर्वान् प्रति समर्पितः श्रीरामः

रामराज्ये मनुष्यः प्रकृतिश्च सर्वे निजधर्मम् अनुवर्तन्ते। ते सर्वेषां हिताय उदारचेतसा त्यागं कुर्वन्ति। तेषां संग्रहणप्रवृत्तिः नास्ति। अस्माकं रामराज्यस्य अपि एतादृशी अवधारणा अस्ति, यस्मिन् राज्ञः अपेक्षा अस्ति यत् सः प्रेम, सौहार्दं, शान्तिं, स्वशासनं च स्थापयेत् इति। भगवान् श्रीरामः यद्धर्मं मर्यादां च राजरूपेण स्थापयति, महात्मगान्धिः हिन्दस्वराज इत्यस्मिन् तस्यैव भारतस्य कल्पनां कृतवान् अस्ति । एतस्य स्वतन्त्रभारतस्य स्थापनायै महात्मगान्धिः सङ्ग्रामं कृतवान् । तस्य शस्त्राणि अपि श्रीरामसदृशानि आसन् । कोदण्डधारी, असुरनिकन्दनरामः, अहिंसाकरुणाप्रतीकः, चिक्रोड-खरदूषण-मारीच-शूर्पणखादिभ्यः न्यायकारी न्यायी श्रीरामः। इमान् सर्वान् प्रति करुणामयः अस्ति श्रीरामः। यदा रावणेन सह युद्धं भवति, आसुरीसभ्यतायाः आगतः विभीषणः च तस्मिन् युद्धे रावणस्य सज्जताम्, आयुधानि, रथम्, गतिम्, तस्य च विधिं दृष्ट्वा संशयग्रस्तः अभवत। अस्य कारणम् अस्ति यद् विभीषणः अपि तस्याः एव भौतिकवादपूरितासुरीसभ्यतायाः आसीत् । तस्य मनसि संशयः जायते यत

**रावनु रथी बिरथ रघुबीरा।**
**देखि बिभीषन भयउ अधीरा।**

अधिक प्रीति मन भा सन्देहा। बंदि चरन कह सहित सनेहा॥

तदा श्रीरामः तस्य संशयं दूरं करोति। यतः श्रीरामस्य कृते स्नेहः, दया, सत्यम्, शुद्धिः, गौरवम्, नैतिकता, करुणा, धर्मः, साहसः चेत्यादयः सद्गुणाः युद्धस्य आयुधानि सन्ति। श्रीरामः सिद्धं करोति यत् युद्धं साहसेन दृढसङ्कल्पेन च जेतुं शक्यते न तु आयुधैः।

### शब्दावली

विधिसम्मतमर्यादायाम् = विधिसम्मत मर्यादा में, सत्यचिन्तनदयादानेषु = सत्य, चिन्तन, दया और दान पर, अवलम्बते = आधारित/टिका है, दम्भाहङ्कारमुक्ताः = दम्भ और अहंकार से मुक्त, चारित्रिकविशिष्टताः = चरित्र की विशेषताएँ, सामाजिकजीवनस्य = समाज के जीवन का, समानाधिकारान् = बराबरी के अधिकारों को, विज्ञातेतिहासे = जाने हुए (प्रसिद्ध) इतिहास में, सामाजिकलक्ष्यप्राप्तये = समाज के लक्ष्य की प्राप्ति के लिए



# संस्कृतभाषायाः महत्त्वम

संस्कृतभाषा देववाणी इति कथ्यते। न केवलं भारतस्य महत्त्वपूर्णा भाषा एषा अपि तु विश्वस्य प्राचीनतमा श्रेष्ठा च भाषा इति मन्यते । किञ्चित्कालपूर्वं मिस्रदेशस्य साहित्यं केभ्यः पाश्चात्त्यविद्भिः प्राचीनतमं मन्यते स्म परन्तु अधुना सर्वे विद्वांसः सर्वसम्मत्या संस्कृतस्य प्रथमशास्त्रं वेदं (ऋग्वेदं) प्राचीनतमं मन्यन्ते । हिन्दुधर्मसम्बद्धाः प्रायः सर्वे धार्मिकग्रन्थाः संस्कृतेन एव लिखिताः सन्ति । बौद्धधर्मस्य अनेके महत्त्वपूर्णाः ग्रन्थाः विशेषतः महायानस्य जैनधर्मस्य च संस्कृते अपि लिखिताः सन्ति । अद्यत्वे अपि यज्ञे पूजायां च संस्कृतमन्त्रमात्रं प्रयुज्यते।

धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः मानवजीवनोपयोगिनोऽपि संस्कृते बहुविस्तरेण चर्चिताः सन्ति । अतः संस्कृतं धर्ममात्रमिति न तथा । भौतिकवाददर्शनसम्बद्धाः विषयाः अपि प्राचीनलेखकैः परिपालिताः आसन् । कौटिल्यस्य अर्थशास्त्रं प्रसिद्धं पुस्तकं यस्मिन् राजनीतिविज्ञानसम्बद्धाः सर्वाः सूचनाः उपलभ्यन्ते । गृहस्थस्य जीवनाय किं कर्तव्यं वात्स्यायनविरचिते कामशास्त्रे सुव्याख्यातम् ।

प्राचीनभारतीयजीवने धर्माय एव अधिकमहत्त्वप्रदानकारणात् संस्कृतं धार्मिकदृष्ट्या अपि विशेषगौरवसंयुतम् । एतेन सह भारतीयधर्मस्य दर्शनस्य च सम्यक् ज्ञानं प्राप्तुं वेदानाम् अध्ययनं ज्ञानं च अतीव महत्त्वपूर्णम् अस्ति ।

वेदाः एव मूलस्रोतः यतः नानाधर्मप्रवाहाः निर्गताः, मानवहृदयं च ते सर्वदा तृप्तवन्तः, न केवलं भारतीयेभ्यः अपि तु अन्यदेशानां किं वा समग्रविश्वस्य च मार्गदर्शकत्वेन।

वेदप्रभावस्य परिणाम एव पाश्चात्त्यविद्वांसः तुलनात्मकपौराणिककथेत्यादीनि नूतनानि शास्त्राणि आविष्कृतवन्तः । अनेन शास्त्रेण ज्ञायते यत् प्राचीनकाले देवसम्बद्धाः जनानां के के विचाराः आसन्, केन प्रकारेण पूजाभिः तदीयाशीर्वादप्राप्तौ सफलाः भवन्ति स्म ।

केवलं कलात्मकदृष्ट्या अपि संस्कृतसाहित्यस्य स्वकीयं विशेषं महत्त्वम् अस्ति । अस्मिन् साहित्ये कालिदासेत्यादीनि काव्यानि रचयन्तः कवयः आसन् । भवभूत्यादयः महान्तः नाटककाराः आसन्।

बाणभट्टेत्यादयः गद्यलेखकाः आसन्, ये त्रिलोकसुन्दर्याः कादम्बर्याः अद्भुतकथां स्वस्यसरसकाव्येन सह पुरस्कृत्य प्रेक्षकान् स्वभक्तं कृतवन्तः, जयदेवेत्यादयः गीतकाव्यलेखकाः आसन्, ये स्वीयमृदुकाव्यमाध्यमेन सहदयहृदयेषु मधुवृष्टिं कृतवन्तः।

श्रीहर्षसदृशाः पण्डिताः आसन् ये काव्यस्य दर्शनस्य च अद्वितीयं संयोजनं कृतवन्तः । एवम् अस्य समृद्धस्य साहित्यस्य महत्त्वं स्वयमेव स्पष्टं भवति ।

संस्कृतभाषायाः स्वकीयं व्यक्तिगतं महत्त्वं न केवलं प्राचीनतायाः, निरन्तरतायाः, व्यापकतायाः, धार्मिक-सांस्कृतिक-मूल्यानां कलायाः च दृष्ट्या, अपि तु धर्म-दर्शनयोः वैचारिकाध्ययनदृष्ट्या अपि स्वकीयं व्यक्तिगतं महत्त्वम् अस्ति ।

संस्कृतभाषा विश्वव्यापिनी भाषा अस्ति तथापि भारतसर्वकारः तस्मिन् विशेषं ध्यानं न ददाति, संस्कृतभाषा सर्वकारेण अधिकाधिकं प्रोत्साहनीया। विद्यालयेषु अपि अनिवार्यतया अध्ययनशिक्षणं भवेत।

प्रत्येकं भारतीयं स्वभारतीम् (संस्कृतभाषाम) अपि पठेत्, निकटभविष्यत्काले संस्कृतभाषां राष्ट्रभाषां कर्तुं प्रयत्नः करणीयः तदा एव भारतस्य भाषाक्षेत्रवादरूपविसंगतीः दूरीकर्तुं शक्नुमः विश्वशान्तिं च स्थापयितुं शक्नुमः।

संस्कृतशब्दस्य उत्पत्तिः

अतः अद्य वयं ज्ञास्यामः यत् संस्कृतभाषायाः उत्पत्तिः कथम् अभवत? संस्कृतशब्दनिर्माणे कस्य महत् योगदानम् आसीत् ? एषः विषयः ज्ञातव्यः अस्ति। अतः अद्य वयम् एतस्मिन् विषये ज्ञातुं प्रयत्नशीलाः भविष्यामः।

संस्कृतभाषायाः उत्पत्तिः कथम् अभवत् ? अस्य मुख्यौ पक्षौ स्तः। विद्वांसः पुस्तकानि च यत् किमपि कुर्वन्ति तस्य माध्यमेन एतत् मतं बहिः आगच्छति। प्रथमः पक्षः यः आङ्ग्लेयैः लिखितः अस्ति तथा च यः अधिकजनैः पठितः अस्ति अथ द्वितीयः पक्षः यः प्राचीनग्रन्थेषु पुस्तकेषु च दृश्यते।

आङ्ग्लेयैः लिखितस्य इतिहासस्य अनुसारेण पाणिनिः खीष्टतः पूर्वस्याम् अष्टमशताब्द्यां संस्कृतव्याकरणं लिखितवान। किन्तु एतत् वक्तुं न युक्तम। पाणिनिपूर्वमपि व्याकरणज्ञाः आसन् । पाणिनिना एव लिखितायाम् अष्टाध्याय्यां सर्वेषां नामानि प्राप्यन्ते, आङ्ग्लेयाः केवलं 3500 वर्षेषु भारतस्य इतिहासं समावेशितवन्तः, दुर्भाग्याद् वयम् अद्यापि तस्यैव इतिहासस्य अध्ययनं कुर्मः।

यदि वयं वैज्ञानिकदृष्ट्या संस्कृतं पश्यामः तर्हि इतिहासः अतीव पुरातनः अस्ति। सम्प्रति प्राप्तः प्राचीनतमः संस्कृतग्रन्थः वेदः अस्ति, यः न्यूनातिन्यूनं सार्धद्विसहस्रवर्षपूर्वं रचितः आसीत् । ऋग्वेदः विश्वस्य प्राचीनतमेषु ग्रन्थेषु अन्यतमः अस्ति । संस्कृतं पूर्वं गीर्वाणभाषा भारती इति नाम्ना वा प्रसिद्धम् आसीत् । केषुचित् स्थानेषु गीर्वाणभारती अपि उच्यते स्म । पाणिनिपूर्वमपि प्रसिद्धं व्याकरणं इन्द्रस्य आसीत् । तस्मिन् प्रतिपदं शब्दचिन्तनं कृतम् । पाणिनेः पूर्वं भारद्वाजाचार्यस्य व्याकरणे अपि एषा एव परम्परा गृहीता आसीत् । तदा पाणिनिना तत्र विचारितमात्रम।

ततः एव सर्वनाम-तद्धिताद्याः बह्वीः परिभाषासंज्ञाः गृहीत्वा टि, घु, भ इत्याद्यनेकाः अपि नवीनाः सञ्ज्ञाः तेन सृष्टाः परन्तु यदा पाणिनिना व्याकरणस्य नियमाः कृताः, तदनन्तरम् एषा भाषा संस्कृतम् इति उक्तङ्गतम् अर्थात् पाणिनिपूर्वं साहित्यं वैदिकसंस्कृतम्, परवर्ति साहित्यं च लौकिकसंस्कृतम् इति कथ्यते।

## शब्दावली

संस्कृतभाषायाः = संस्कृत भाषा का,
तदीयाशीर्वादप्राप्तौ = उनके आशीर्वाद की प्राप्ति होने पर, स्वीयमृदुकाव्यमाध्यमेन = अपने कोमल काव्य के माध्यम से, सहृदयहृदयेषु = सहृदयों के हृदयों में, भाषाक्षेत्रवादरूपविसंगतीः = भाषावाद, क्षेत्रवाद रूप विसंगतियों को, दूरीकर्तुम् = दूर करने के लिए, वैज्ञानिकदृष्ट्या = वैज्ञानिक दृष्टि से, न्यूनातिन्यूनम् = कम से कम, पाणिनिपूर्वम् = पाणिनी से पहले, लौकिकसंस्कृतम् = लौकिक संस्कृत



# संस्कृतंजानीयाम्

## प्रथमः पाठ

1.1 'अस्ति-भवति' अथ 'सः-कः-कुत्र' एतेषां पदानां परिचयः

अस्ति = है। भवति = होता है। सः = वह। कः = कौन।

कुत्र = कहाँ।

रामः कुत्र अस्ति? (राम कहाँ है?)

रामः गृहे अस्ति। (राम घर पर है।)

सीता कुत्र अस्ति? (सीता कहाँ है?)

सीता विद्यालये अस्ति (सीता विद्यालय में है।)

सः कः अस्ति? (वह कौन है?)

रामः कः अस्ति? (राम कौन है?)

अङ्गुलि-निर्देशेन - सः रामः अस्ति (उंगली दिखाकर = वह राम है।)

रामः दशरथपुत्रः अस्ति। (राम दशरथ-पुत्र है।)

सीता का अस्ति? (सीता कौन है?)

साङ्गुलिनिर्देशम्; सीता सा अस्ति। (उँगली दिखाकर; सीता वह है।)

सीता रामपत्नी अस्ति। (सीता राम-पत्नी है। )

किञ्चित् अभ्यस्यताम् (थोड़ा अभ्यास करें, इनका अनुवाद करें)

सीता कुत्र अस्ति?

सा विद्यालये अस्ति।

का विद्यालये अस्ति?

सा सीता विद्यालये अस्ति।

## प्रथमः पाठः 1.2

वृक्षः - पेड़। वानरः - बन्दर। भवति - होता है। बनता है। सत्यम् - सच। कीदृशः - कैसा। कीदृशी - कैसी।

(टिपण्णी = किसी भी शब्द के अन्त में ए लगा दो, तो उसका अर्थ में/पर हो जायेगा। वने - वन में। वृक्षे - वृक्ष पर, आदि।)

वृक्षः कुत्र भवति? (वृक्ष कहाँ होता है?)

वृक्षः वने भवति। (वृक्ष वन में होता है।)

सः कीदृशः भवति? (वह कैसा होता है?)

सः परोपकारी भवति। (वह परोपकारी होता है।)

नदी कुत्र भवति? (नदी कहाँ होती है?)

नदी नगरे भवति। (नदी नगर/शहर में होती है।)

सा कीदृशी भवति? (वह कैसी होती है?)

सा शीतला भवति। (वह शीतल होती है।)

कानिचन उदाहरणानि (सानुवादम्) :

1) घटः भवति (घट बन रहा है।)

2) वृक्षे वानरः अस्ति (वृक्ष पर वानर है।)

3) वानरः चञ्चलः भवति (वानर चञ्चल होता है।)

4) काष्ठतन्तुः चित्रपतगः भवति। (झिल्ली/caterpillarझिल्ली बनता है।)

5) अध्येता बुद्धिमान् अस्ति। (अध्येता बुद्धिमान है।)

6) सः उत्तीर्णः भवति। (वह उत्तीर्ण/passहोता है।)

7) सीता गृहे नास्ति। (सीता घर पर नहीं है।)

8) सा विद्यालये अस्ति। (वह विद्यालय में है।)

9) कः * पुत्रः सर्वोतमः अस्ति? (कौनसा पुत्र सर्वोत्तम है?)

10) रामः श्रेष्ठः सर्वोत्तमः अस्ति। (राम सबसे बड़ा सर्वोत्तम है।)

व्यवाहरिकवाक्यानि :

सर्वं कुशलम्? (सब कुछ कुशल है?)

आम् (हॉ)।

पिता कुशली, माता कुशलिनी, गृहे सर्वं कुशलम् । (पिता कुशल हैं, माता कुशल है, घर में सब कुशल है।)

बाढम् (बढ़िया।) (बाढम् मतलब बढ़िया, ह्न्म, अच्छा, सुन्दर आदि।)

उदाहरणम् = बाढमित्यब्रवीद्रामस्तौ चानुज्ञाप्य राघवम्।। रामायणम् = 7 ।94 ।30 ।।

(लवकुश से रामायणकथा सुनकर राम बोले बाढम् और दोनों राम से अनुमति लेकर वाल्मीकि के पास गए।)

रामः कथम अस्ति? (राम कैसे हैं?)

रामः स्वस्थः अस्ति। (राम स्वस्थ हैं।)

कथम् अर्थात्, कैसे/कैसा या किस प्रकार से किस प्रकार का

पादलेखाः

* (न+अस्ति = नास्ति)

- कः यह पद कौन-सा इस अर्थ में भी प्रयोग हो सकता है, कौन-सा के लिए भी एक अलग शब्द है।

कौन बालक आया? कौन बेटा अव्वल आया? ऐसे उत्तर भारत में काफी प्रयोग होते हैं।



# राष्ट्रियशक्तेः प्रमुखनिर्धारकाः

### (1) भौगोलिकतत्त्वम्

मोर्गेन्थाउ इत्यस्य मते रष्ट्रियशक्तिनिर्धारणे भूगोलस्य स्थानम् अतीव महत्त्वपूर्णम् अस्ति । कस्यापि राष्ट्रस्य विदेशनीतिनिर्धारणे अन्ताराष्ट्रियसम्बन्धनिर्धारणे भूगोलस्य विशेषं महत्त्वम् अस्ति । राष्ट्रस्य भूमिक्षेत्रं, जलवायुः, स्थितिः, प्राकृतिकसंसाधनम् इत्यादीनि स्वतः एव शक्तितत्त्वस्वरूपाणि। अस्मिन् भूमिक्षेत्रस्य परिमाणस्य विशेषं महत्त्वम् अस्ति । राष्ट्रस्य भूमिक्षेत्रस्य विशालतया सह तस्य शक्तिः अपि वर्धते । विशाले भूमिक्षेत्रे अधिका जनसंख्या प्राकृतिकसंसाधनं च प्राप्तुं शक्यते । परन्तु केवलं भूमिक्षेत्रं राष्ट्रस्य शक्तिनिर्माणस्य आधारः इति न गणयितुं शक्यते, अन्येषां तत्त्वानां पर्याप्तिः अत्यावश्यकी।

### (2) प्राकृतिकसंसाधनम् -

राष्ट्रियशक्तिनिर्माणे अन्यत् महत्त्वपूर्णं तत्त्वं प्राकृतिकसंसाधनम् अस्ति । प्राकृतिकसम्पदः भूमि, खनिजान्, सम्पत्तिम् इत्यादिकं निर्दिशन्ति । एतानि संसाधनानि प्रत्येकराष्ट्रार्थं स्थायीनि, अत्यावश्यकानि च भवन्ति । पामर–पार्किन्स् इत्येतयोः मतयोः चत्वारि प्राकृतिकसंसाधनानि अपक्ववस्तुजातानि, खनिजाः, खाद्यपदार्थाः, औद्योगिकशक्तिसाधनानि च सन्ति । अन्नधान्यं विना कश्चिदपि देशः जीवितुं न शक्नोति। अन्नधान्येषु प्रत्येकं राष्ट्रं स्वावलम्बि भवेत्। अन्नस्य दृष्ट्या यदि देशः स्वावलम्बी न भवति तर्हि अन्ताराष्ट्रियराजनीत्यां देशस्य स्थितिः दुर्बला एव तिष्ठति। लोहम् अङ्गारं तैलं च अपक्ववस्तुजातदृष्ट्या अत्यन्तमहत्त्वास्पदानि सन्ति। अपक्ववस्तुजातद्वारा एव सैन्यसामग्रीणां शस्त्राणां च निर्माणं कृत्वा राष्ट्रं स्वशक्तिं वर्धयितुं शक्नोति ।

### (3) जनसंख्या -

जनसंख्यायाः उपस्थितिः अभावः वा राष्ट्रियशक्तितत्त्वरूपेण अपि माहात्म्यं भजते । वर्तमानयुगे अल्पजनसंख्यायुक्तं राष्ट्रमपि प्रौद्योगिकीविकासद्वारा शक्तिसम्पन्नं भवितुम् अर्हति । अथापि राष्ट्रियशक्तिनिर्माणे जनसंख्यायाः महत्त्वं पर्याप्तम् अस्ति । राष्ट्रस्य जनसंख्या यथा अधिका भवति तथा तस्य सेनायाम् अधिकाः सैनिकाः, निर्माण्यादिषु कार्यं कर्तुम् अधिकाः श्रमिकाः च भवन्ति । परन्तु अधिका जनसंख्या राष्ट्रस्य विकासे बाधाम् अपि जनयति। अतिजनसंख्यायाः कारणात् राष्ट्रियैकतायाः कृते क्षतिः भवितुम् अर्हति, अन्नधान्यस्य समस्या अपि उत्पद्यते ।

### (4) प्रौद्योगिकी

प्रौद्योगिकी विज्ञानस्य व्यावहारिकरूपम् अस्ति । आधुनिकयुगे प्रौद्योगिक्याः महान् प्रभावः अस्ति । प्रौद्योगिक्याः अन्तर्गतं ते सर्वे वैज्ञानिकाः आविष्काराः साधनानि च आगच्छन्ति ये राष्ट्रस्य भौतिकसमृद्धौ सहायकाः भवन्ति। अन्ताराष्ट्रियराजनीतिः त्रिषु क्षेत्रेषु प्रौद्योगिक्याः विकासेन बहुप्रभाविता जाता अस्ति।

(i) औद्योगिकप्रौद्योगिकी – राष्ट्राणि अपक्ववस्तुजाताभावात् अपि मुक्तं करोति। एतेन निवासिनः जीवनस्तरः अपि प्रवर्धयितुं शक्यः ।

(ii) संचारप्रौद्योगिकी – अत्र तानि साधनानि आयान्ति यानि वस्तूनाम्, जनानां, विचाराणां च आदानप्रदानं कुर्वन्ति। राष्ट्रियसर्वकारः आकाशवाणी–दूरदर्शनादिप्रचारमाध्यमेन सामान्यजनं प्रभावितं करोति । संचारमाध्यमेन विभिन्नराष्ट्राणां सम्बन्धाः स्थापिताः भवन्ति । एतस्य अन्ताराष्ट्रियकूटनीत्यां नैतिकतायां च गहनः प्रभावः भवति ।

(iii) अन्ताराष्ट्रियराजनीतिः – एतस्याः दृष्ट्या सैन्यप्रौद्योगिक्याः क्षेत्रे विकासेन राष्ट्रियशक्तिः बहुप्रभाविता जायते । सम्प्रति सैन्यप्रौद्योगिक्यां प्रतिदिनं नूतनपरिवर्तनानि दृश्यन्ते । अद्यत्वे सैन्यसङ्घटनस्य परिमाणमात्रं महत्त्वपूर्णं नास्ति अपि तु तदीयोपकरणं कियत् आधुनिकम् अस्ति इत्येव । राष्ट्रियशक्तिदृष्ट्या एतत् तथ्यम् अतीव महत्त्वपूर्णम् अस्ति।

### (5) सैन्यशक्ति :

यावत् राष्ट्राणि स्वविवादनिराकरणार्थं युद्धस्य आश्रयं कुर्वन्ति तावत् सैन्यशक्तिः राष्ट्रियशक्तेः महत्त्वपूर्णं कारकं अवश्यमेव तिष्ठति । राष्ट्रस्य सैन्यशक्तेः अन्तर्गतं वयं सैन्यसङ्घटनरूपस्य आधारस्य महत्त्वं दातुं शक्नुमः । सैन्यसङ्घटनस्य परिमाणमात्रं यावत् बृहत् भवति तावत् सः देशः अधिकशक्तिशाली इति मन्यते । परन्तु सम्प्रति युद्धस्य उपकरणेषु नवीनतमविकासस्य कारणात् न केवलं सैन्यसङ्घटनस्य परिमाणमात्रं महत्त्वपूर्णं भवति अपि तु एतत् उपकरणं कियत् आधुनिकम् अस्ति, राष्ट्रियशक्तिम् अवलोक्य एतत् तथ्यं मनसि स्थापयितव्यम् अस्ति, अद्यतनयुगे प्रौद्योगिकीविकासस्य कारणात् सन्नद्धतायां नवीनता, तत्र च अनुकूलतायाः अधिकता महत्त्वपूर्णा अभवत् । सम्प्रति सैन्यशक्तेः महत्त्वपूर्णः पक्षः परमाणुशस्त्राणि सन्ति ।

### (6) राष्ट्रियं मनोबलम्

राष्ट्रियमनोबलं देशस्य जनानां तासां इच्छानां योगः इति कथ्यते येषां कारणात् ते व्यक्तिगतकल्याणात् उपरि राष्ट्रकल्याणं धारयन्ति । स्वाभाविकतया जनस्य त्यागस्य भावना एतेषु समाविष्टा भवति। युद्धकाले यदा सेनापुरुषाः देशस्य नागरिकाः च सैन्यप्रयोजनार्थं धैर्यं दर्शयन्ति तदा राष्ट्रियमनोबलस्य विशेषं महत्त्वं भवति । यद्यपि शान्तिकाले अपि मनोबलस्य महत्त्वं न निराकर्तुं शक्यते। अस्य उत्तमं उदाहरणं 1940 तमे दशके ग्रेट्ब्रिटेनदेशः अस्ति । भारतेन पाकिस्तानं विरुध्य युद्धेषु (1948, 1965, 1971, 1999) 1962 तमे वर्षे च चीनदेशेन सह युद्धे, एवं तेषु चतुर्षु युद्धेषु भारतीयाः स्वमनोबलं प्रदर्शितवन्तः ।

### (7) राष्ट्रियनैतिकता

वस्तुतः राष्ट्रियनीतिः राष्ट्रैकतायाः प्रतीकम् आत्मा च अस्ति। राष्ट्रियनीतियुक्तस्य राष्ट्रस्य उपरि बाह्याक्रमणानि अपि सफलानि न भवितुम् अर्हन्ति । राष्ट्रिय–नैतिकता–निर्माणे राष्ट्रियचरित्रं, शासनरूपं, संस्कृतिः, नेतृत्वं, स्थितिः इत्यादयः प्रभावम् उत्पादयन्ति ।

### (8) आर्थिकव्यवस्था

ते मूलभूतसिद्धान्ताः आर्थिकव्यवस्थायाः अन्तर्गतम् आगच्छन्ति यैः उत्पादनवितरणयोः परिस्थितयः नियन्त्रिताः भवन्ति । आर्थिकव्यवस्था निजीसम्पत्त्याः, राज्यपरस्य धनपरपुञ्जवादस्य, समाजवादस्य वा आधारेण सम्यग् भवितुम् अर्हति ।

### (9) राजनीतिपरा व्यवस्था -

राष्ट्रियशक्तिनिर्माणे राजनैतिकव्यवस्थायाः केन्द्रस्थानं वर्तते । वस्तुतः सर्वोत्तमराजनैतिकव्यवस्था सा एव भवति या राष्ट्रस्य सांस्कृतिकप्रत्ययैः सह सङ्गता भवति तथा च प्रशासनं सुसंघटितं, निष्पक्षं, प्रभावि च जायते । राष्ट्रस्य विदेशनीतिनिर्धारणे, कार्यान्वयने च राजनैतिकव्यवस्थायाः विशेषं स्थानं वर्तते।

### (10) सामाजिकव्यवस्था

राष्ट्रियशक्तितत्त्वरूपेण सामाजिकव्यवस्थायाः सर्वाधिकमहत्त्वम् अस्ति । समाजस्य येषु खण्डेषु परस्परं संघर्षः भवति, सन्ततयः च अत्रत्याः अल्पसंख्याकाः सन्ति। अतः तत् राष्ट्रं शक्तिशालि न भवितुम् अर्हति।

### (11) विचारधारा

अधिकविदुषां मते राष्ट्रियशक्तिविकासे राजनैतिकविचारधारा अपि अतीव महत्त्वपूर्णा अस्ति । प्रत्येकदेशस्य स्वकीया पृथक् राजनैतिकव्यवस्था अस्ति, या विचारधाराविशेषाधारिता भवति । तया एव विचारधारया प्रेरिताः राष्ट्रस्य नागरिकाः राष्ट्रहिताय आत्मत्यागं कर्तुं सज्जाः जायन्ते, पाश्चात्त्यदेशाः लोकतान्त्रिकसिद्धान्तेषु विश्वासं कुर्वन्ति, साम्यवादिविचारधारा आक्रामिका शासनाधारिता च इति वर्ण्यते । अत्र साम्यवादिदेशाः पाश्चात्त्यदेशानां साम्राज्यवादस्य उपनिवेशवादस्य च विरोधं कुर्वन्ति । तस्य मते पाश्चात्त्यधनपरपुञ्जवादाश्रिता विचारधारा साम्राज्यवादं प्रवर्धयति, विच्छेदान् युद्धान् च जनयति परन्तु अद्यापि आधुनिकयुगे लोकतान्त्रिक–साम्यवादिरूप–मुख्यविचारधाराद्वयं वर्तमानान्ताराष्ट्रिय–राजनीत्यां व्यापकरूपेण प्रभावम् उत्पादयत् वर्चस्वं धारयति।

### (12) नेतृत्वम्

राष्ट्रियशक्तिनिर्धारकेषु तत्त्वेषु नेतृत्वस्य अपि महत्त्वपूर्णं स्थानं वर्तते । नेतृत्वाभावे राष्ट्रमनोबलमपि तुच्छं भवति । युद्धस्य शान्तेः च काले राष्ट्रियशक्तेः तत्त्वरूपेण नेतृत्वस्य महत्त्वपूर्णा भूमिका भवति । युद्धकाले खाद्यपदार्थानां विशालः भण्डारः, औद्योगिकापक्ववस्तुजातस्य रक्षणं, औद्योगिकनिर्माणीनां संचालनं, राष्ट्रियमनोबलस्यसंवर्धनम् इत्यादिकं सर्वं कुशलनेतृत्वेन एव सम्भवति । शान्तिकाले नेतृत्वं अन्ताराष्ट्रियमञ्चे स्वराष्ट्रस्य शक्तिं विवेकपूर्वकं प्रदर्शयति । एवं राष्ट्रियशक्तिनिर्माणे नेतृत्वस्य अतीव महत्त्वं भवति ।

#### शब्दावली

राष्ट्रियशक्तेः = राष्ट्रीय शक्ति का, अन्ताराष्ट्रियसम्बन्धनिर्धारणे = अन्ताराष्ट्रीय सम्बन्ध के निर्धारण में, राष्ट्रियशक्तिनिर्माणे = राष्ट्रीय शक्ति के निर्माण में, अपक्ववस्तुजातदृष्ट्या = कच्चे माल की दृष्टि से, स्वविवादनिराकरणार्थम् = अपने विवाद के निराकरण के लिए, विदेशनीतिनिर्धारणे = विदेश नीति के निर्धारण में, राष्ट्रहिताय = राष्ट्र के हित के लिए

# भारतस्य नेतृत्वे विकासशीलदेशानां कुम्भः

## प्रधानमन्त्रिणा मोदिना आरआरआरआर इत्येतत् नूतनं सूत्रं दत्तम्

**विश्वस्य अल्पविकसितं, निर्धनं, वैश्विकदक्षिणं च एकत्र आनेतुं भारतेन वॉयस् आफ् ग्लोबल साउथ् इति आभासीयसभायाः आयोजनं कृतम् अस्ति तथा च तस्मिन् भागं ग्रहीतुं 120 देशाः आमन्त्रिताः सन्ति। वैश्विकदक्षिणप्रमुखाणां शिखरसभायां प्रधानमन्त्री मोदी भाषणं कृतवान्। प्रधानमन्त्री मोदी उक्त वान् यत् अहम् अस्मिन् सत्रे भवतः स्वागतं करोमि, नूतने वर्षे नूतनोर्जया, नूतनाशाया च सह वयं मिलन्तः स्मः। सः अवदत् यत् 130 कोटिभ्यः अधिकेभ्यः भारतीयेभ्यः पक्षतः अहं भवद्भ्यः सर्वेभ्यः देशवासिभ्यः 2023वर्षस्य शुभकामनाः समर्पयामि। मोदी उक्त वान् यत् वयम् अन्यदपि कठिनवर्षं पृष्ठीकृतवन्तः, येन अस्मभ्यं युद्धानि, आतङ्कवादः, राजनीतिपरः आपीडः च दर्शितानि। एतैः सह अन्नोर्वरकस्य इन्धनस्य च मूल्येषु वृद्धिः अभवत् । मोदी उक्त वान् यत् विश्वं संकटग्रस्तम् इति स्पष्टम् अस्ति, अयं अस्थिरताकालः कियत्कालं यावत् स्थास्यति इति पूर्वानुमानं कर्तुं कठिनम् अस्ति।**

### अष्टदशकप्राक्त नसन्दर्शे परिवर्तनं भवति

- मोदी उक्तवान् यत् वैश्विकभविष्यस्य विषये अस्माकं वैश्विकदक्षिणजनानां सर्वतः अधिकभागः अस्ति। अस्माकं अपि समानस्वरः भवतु इति महत्त्वपूर्णम्। वैश्विकप्रबन्धनस्य अष्टदशकप्राक्तनं प्रतिरूपं परिवर्तनं प्राप्नोति, तस्य आकारे वयं स्वभागं निर्वहेम इति अत्यावश्यकम। सः अवदत् यत् विश्वस्य प्रमुखसमस्यानां निर्माणे वैश्विकदक्षिणस्य काचिदपि भूमिका नास्ति परन्तु अस्मान् एताः सर्वतः आधिक्येन प्रभावयन्ति। जलवायुपरिवर्तनस्य, कोरोणा-महामार्याः, आतङ्कवादस्य, रूस-यूक्रेन-युद्धस्य अपि सन्दर्भे अस्माभिः एषः प्रभावः दृष्टः अस्ति । एतासां समस्यानां समाधानम् अन्वेष्टुम् अपि अस्माकं भूमिकायाः अस्माकं स्वरेभ्यः च स्थानं न दीयते।
- प्रधानमन्त्रिणा उक्तं यत् भारतेन सर्वदा वैश्विकदक्षिणस्य भ्रातृभगिनीभिः सह स्वविकासानुभवाः संविभाजिताः। अस्माकं विकाससहभागितायोजनाः विभिन्नेषु देशेषु भिन्नक्षेत्रेषु च वर्तन्ते। सः अवदत् यत् वयं कोरोणा-महामारी-काले शत-तमेभ्यः अधिकेभ्यः देशेभ्यः सूच्यौषधानां च आपूर्तिं कृतवन्तः। अस्माकं साधारण-भविष्यस्य निर्णये भारतं सदैव विकासशील-देशानां महतीं भूमिकां प्रति स्थिरः अस्ति। सः अवदत् यत् यथा यथा भारतं त्र20 इत्येतस्य समूहस्य आध्यक्ष्यम् आरभते तथा तथा वयं वैश्विकदक्षिणस्य स्वरं सुदृढं कुर्मः इति स्वाभाविकम।



### 'एका पृथिवी, एकः परिवारः, एकं भविष्यम' इति विषयः

- मोदी उक्तवान् यत् वयं अस्माकं त्र20 इत्येतस्य समूहस्य अध्यक्षतायाः विषयम् अपि चिनुमः – एका पृथिवी, एकः परिवारः, एकं भविष्यम् इति। सः अवदत् यत् अस्माकं सांस्कृतिक मूल्यानां अनुरूपम् अपि अस्ति यत्र मानवकेन्द्रितविकासद्वारा एकता सम्भवति। वैश्विकदक्षिणं विकासस्य लाभात् बहिष्कर्तुं न शक्यते। मोदी उक्तवान् यत् अस्माभिः मिलित्वा विश्वस्य राजनैतिक–वित्तीय–प्रबन्धनस्य पुनर्निर्माणे स्वभागः आचरणीयः। एतेन असमानतायाः न्यूनीकरणस्य, नूतनानाम् अवसराणां निर्माणस्य च अवसरः प्राप्यते । एतेन सह एव, विकासस्य प्रवर्धनानयने, समृद्धिसमानयने च साहाय्यम् आप्स्यते। मोदी अवदत् यत् एतदर्थम् आवश्यकं यत् वयं 4आर अर्थात् Respond, Recognize, Respect, Reform इत्यस्य आह्वानं कुर्मः। सः अवदत् –

### प्रतिक्रियां ददातु

- वैश्विकदक्षिणस्य आवश्यकतानां विषये प्रतिक्रिया दातव्या अथ तदर्थं समावेशात्मिकीः सन्तुलिताः च अन्ताराष्ट्रियकार्यसूची निर्मातव्या।

### स्वीकुर्वन्तु

- स्वीकुर्वन्तु यत् सर्वाणि वैश्विकाह्वानानि पूरयितुं संविभाजनरपस्य दायित्वस्य आवश्यकता वर्तते परन्तु विभेदितोत्तरदायित्वप्रणालीनाम् आवश्यकता वर्तते।

### सम्माननम्

- सर्वेषां देशानां सम्प्रभुतायाः आदरः कर्तव्यः, विवादानां शान्तिपूर्णरीत्या निराकरणव्यवस्था सुनिश्चिता आवश्यकी च भवति ।

### परिष्कारः

- संयुक्तराष्ट्रसहितासु अन्ताराष्ट्रियप्रबन्धनस्य सर्वासु संस्थासु परिष्कारस्य आवश्यकता वर्तते यद्द्वारा तासां प्रासंगिकता स्थापयितुं शक्यते ।

### 'भवतः स्वरः, भारतस्य स्वरः'

- प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् विकासशीलदेशानां समक्षं आह्वानानाम् अभावेऽपि अहं आशावादी अस्मि यत् अस्माकं समयः आगमिष्यति। समाजस्य परिवर्तनार्थम् अस्माकं देशेषु सरलं, बृहत्स्तरीयं, स्थायि च समाधानान्वेषणम् अत्यावश्यकम् । सः अवदत् यत् एतेन प्रकारेण वयं विकासशीलदेशानां सम्मुखम् आगतानां सर्वेषाम् आह्वानानां समाधानं कर्तुं शक्नुमः, नाम तत् दारिद्र्यम्, स्वास्थ्यसुरक्षा, मानवक्षमताविकासः एव स्यात। विगतशतके वयं विदेशशासनात् मुक्तिं प्राप्तुं परस्परं साहाय्यं कृतवन्तः । मोदी उक्तवान् यत् अस्मिन् शतके पुनः एकवारं वयं सहभागितां कर्तुं शक्नुमः येन अस्माकं जनानां कल्याणं सुनिश्चितं भवेत। भवतः स्वरः भारतस्य वाणी अस्ति यावत् भारतस्य विषये भवतः प्राथमिकता भारतस्य प्राथमिकता अस्ति।

**शब्दावली**

शिखरसभायाम् = शिखर सभा में, मिलित्वा = मिल कर, प्रवर्धनानयने = बढ़ोत्तरी लाने में, समृद्धिसमानयने = समृद्धि को ठीक से लाने में, वैश्विकाह्वानानि = वैश्विक चुनौतियों को, पूरयितुम् = पूरा करने के लिए, समाधानान्वेषणम् = समाधान/उपाय का अन्वेषण











मातुः सीतायाः प्राकट्यक्षेत्रे सीतामढ़ीनगर्यां मातुः 251 फीट्मितायाः समुच्चायाः प्रतिमायाः स्थापनादिशि अथ च सम्बद्धक्षेत्रस्य शक्तेः पर्यटनस्य स्थलरूपेण विकासदिशि रामायणानुसन्धानपरिषदः तत्त्वावधाने सततपदक्षेपः श्रीराममन्दिरस्य (अयोध्यास्थस्य) निर्माणे संलग्नः शिल्पकारः आशीषसोमपुरावर्यः आइआइटीपटना- दलेन सह सीतामढ़ी- नगर्यां सम्बन्धितस्थलस्य भ्रमणं कृतवान्। श्रीकामेश्वरचौपालः, श्रीभगवतीसीतातीर्थक्षेत्रसमितेः अन्ताराष्ट्रियाध्यक्षः, अध्यक्षः श्रीसुनीलकुमारपिण्टूवर्यः (स्थानीयसांसदः) च सम्बद्धस्थलं दर्शयन्तः

**रामायण वार्ता**
**प्रकाशन समितिः**

**मुख्य मार्गदर्शक- श्री श्री 1008 परमहंस पूज्य सांदीपेंद्र जी महाराज (माता बगलामुखी मंदिर प्रांगण, नलखेड़ा, मप्र)**
**संयोजकः** कामेश्वर चौपाल (सदस्य, श्रीराम जन्मभूमि तीर्थ क्षेत्र न्यास एवं अंतरराष्ट्रीय अध्यक्ष, (श्रीभगवती सीता तीर्थ क्षेत्र समिति)
**अध्यक्षः** विजय बघेल (सांसद, दुर्ग, छत्तीसगढ़)
**सचिवः** रौशन सिंह (प्रचारक, आरएसएस)
**अध्यक्ष, बोर्ड ऑफ ट्रस्टीः** (रामायण रिसर्च काउंसिल) अजय भट्ट
**कानूनी सलाहकारः** राकेश खन्ना
**सलाहकारः** एनके झा
**प्रबंधनः** राजीव सिंह
**अनुवादः** नारायण दत्त मिश्र
**शोधः** देव रत्न शर्मा, अवधेश सिंह एवं पिताबंर मिश्र
**सलाहकार संपादकः** शैलेश पांडेय
**सहयोगी संपादकः** केवल कपूर
**तकनीकी सहयोगी संस्थाः** आईआईटी, पटना
**आईटीः** सुभाष झा
**डिजाइनः** रोहित मिश्र
**संपादकः** चंद्रशेखर मिश्र
**प्रकाशक एवं मुद्रकः** कुमार सुशांत

संस्कृत पाक्षिक समाचार पत्र रामायण वार्ता –रामायण रिसर्च काउंसिल के लिए प्रकाशक, मुद्रक- कुमार सुशांत द्वारा साईं प्रिंटिंग प्रेस बी–42, सेक्टर–7, नोएडा 201301, उ.प्र. से मुद्रित कराकर, प्लाट नं. 52/53, एफ ब्लॉक, उत्तम नगर, ओम विहार, डीके मोहन गार्डेन, पश्चिमि दिल्ली से प्रकाशित। *संपादक–चंद्रशेखर मिश्रा। समस्त विवादों का न्याय क्षेत्र दिल्ली मान्य होगा।